नं० ८०१-घ

अलंकारसर्वस्वम् (सम्पूर्णम्)

नं० ८०१-घ
पत्राणि ५-६

५८ पत्रे

नं० ८०१-घ
अलंकारसर्वस्वम्
पत्राणि ५-६

अलंकारसर्वस्व ५९
१५५०

अ॰
स॰ स॰
१

ॐ नमो गुरवे सरस्वतीरूपाय नमस्कृत्य [illegible]ां त्रिविधविग्रहाम् निजालंकारसू
त्राणां वृत्त्या तात्पर्यमुच्यते ॥ इह हि भामहोद्भ[illegible]तयः तावच्चिरंतनालंकारकाराः प्रती
यमानमर्थं वाच्योपस्कारकतया लंकारपक्षनिक्षिप्तं मन्यन्ते तथाहि पर्यायोक्ताप्रस्तुतप्र
शंसासमासोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयादौ वस्तुमात्रं गम्यमानं वाच्योपस्कार
कत्वेन स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणमिति यथायोगं द्विविधया भंग्या प्रतिपादि
तं तैः रुद्रटेन तु भावालंकारो द्विधैवोक्तः रूपकदीपकापह्नुतितुल्ययोगितादावुपमाद्यलं
कारो वाच्योपस्कारकत्वेनोक्तः उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता रसवत्प्रेयःप्रभृतौ र
सभावादिर्वाच्यशोभाहेतुत्वेनोक्तः तदित्थं त्रिविधमपि प्रतीयमानमलंकारतया ख्यापि
तमेव वामनेन तु सादृश्यनिबंधनाया लक्षणाया वक्रोक्त्यलंकारत्वं ब्रुवता कश्चिद्ध्व
निभेदोऽलंकारतयैवोक्तः केवलं गुणविशिष्टपदरचनात्मिका रीतिः काव्यात्मत्वेनोक्ता ।
उद्भटादिभिस्तु गुणालंकाराणां प्रायशः साम्यमेव सूचितम् विषयमात्रेण भेदप्रतिपाद
नात् संघटनाधर्मत्वेन चेष्टेः तदेवमलंकारा एव काव्ये प्रधानमिति प्रा

व्यानां मतम् वक्रोक्तिजीवितकारः पुनर्वैदग्ध्यभंगीभणितिस्वभावां बहुविधां वक्रोक्तिमे
व प्राधान्यात्काव्यजीवितमुक्तवान् व्यापारस्य प्राधान्यं च काव्यस्य प्रतिपेदे अभिधाप्रकार
विशेषा एव चालंकाराः सत्यपि त्रिभेदे प्रतीयमाने व्यापाररूपा भणितिरेव कविसंर
म्भगोचरः उपचारवक्रतादिभिः समस्तो ध्वनिप्रपंचः स्वीकृतः केवलमुक्तिवैचित्र्यजीवि
तं काव्यं न व्यंग्यार्थजीवितमिति तदीयं दर्शनं व्यवस्थितं भट्टनायकेन तु व्यंग्यव्यापार
स्य प्रौढोक्त्याभ्युपगतस्य काव्यांशत्वं ब्रुवता न्यग्भावितशब्दार्थस्वरूपस्य व्यापारस्यैव प्रा
धान्यमुक्तम् तत्राप्यभिधाभावकत्वलक्षणव्यापारद्वयोत्तीर्णो रसचर्वणात्मैव भोगापर
पर्यायो व्यापारः प्राधान्येन विश्रांतिस्थानतयांगीकृतः ध्वनिकारः पुनरभिधातात्पर्य
लक्षणाख्यव्यापारत्रयोत्तीर्णस्य ध्वननद्योतनादिशब्दाभिधेयस्य व्यंजनव्यापारस्यावश्या
भ्युपगमनीयत्वात् व्यापारस्य च वाक्यार्थत्वाभावाद्वाक्यार्थस्यैव च व्यंग्यरूपस्य गुणालं
कारोपस्कर्तव्यत्वेन प्राधान्याद्विश्रांतिधा[illegible]त्वमात्मत्वं सिद्धांतितवान् व्यापारस्य विष
यमुखेन स्वरूपप्रतिलम्भात्तत्प्राधान्येन [illegible] तदेव स्वरूपेण विदितत्वाभावाद्विषयस्यैव

अ॰ समग्रभावसाहित्त्वेनम् तस्माद्विषयएववं [illegible] प्रत्वेनेवक्तव्यः यस्यगुणालंकारकृतचा

स॰ स्व॰ २ रुत्वपरिग्रहसाम्राज्यं रसादयस्तज्जीवितभूताः [illegible] कारकत्वेनवाच्याः अलंकाराणामुपस्का

४ रकत्वाद्रसादीनांचप्राधान्येनोपस्कार्यत्वात् तस्माद्व्यंग्यएववाक्यार्थीभूतः काव्यजीवितमि

त्येषएववचपक्षोवाक्यार्थविदांसहृदयानामावर्जकः व्यंजनव्यापारस्यसर्वैरनपह्नुतत्वा

त्तदाश्रयणेनपक्षांतरस्याप्रतिष्ठानात् यत्तुव्यक्तिविवेककारोवाच्यस्यप्रतीयमानंप्रति

लिंगतयाव्यंजनस्यानुमानांतर्भावमाख्यत् तद्वाच्यस्यप्रतीयमानेनसहतादात्म्यतदुत्प

त्त्यभावात् अवचारिताभिधानम् तदेतत्कुशाग्रधिषणैः क्षोदनीयमतिगहनमितिने

हप्रतन्यते अस्तितावद्व्यंग्यनिष्ठोव्यंजनाव्यापारः तत्रव्यंग्यस्यप्राधान्याप्राधान्याभ्यांध्वनि

गुणीभूतव्यंग्याख्यौद्वौकाव्यभेदौव्यंग्यस्यास्फुटत्वेलंकारत्वेनचित्राख्यःकाव्यभेदस्तृती

यः तत्रोत्तमोध्वनिः तस्यलक्षणाभिधामूलत्वेनाविवक्षितवाच्यविवक्षितान्यपरवाच्या

ख्यौद्वौभेदौ आद्योपि अर्थांतरसंक्रमितवाच्यात्यंततिरस्कृतवाच्यत्वेनद्विविधः द्वितीयोप्य

संलक्ष्यसंलक्ष्यक्रमव्यंग्यतयाद्विविधोलक्षणामूलशब्दशक्तिमूलोवलक्ष्यध्वनिरसंलक्ष्यक्रम

२

व्यंग्यार्थे शक्तिमूलो रसादिध्वनिः संलक्ष्यक्रमव्यंग्यः शब्दार्थोभयशक्तिमूलो वस्तुध्वनिरलं-
कारध्वनिश्चेति तत्र रसादिध्वनिरलंकारमञ्जर्यां प्रदर्शितः काव्यस्य शृंगारप्रधानत्वात् शे-
षस्तु यथावसरं तत्रैवाविभक्तापवर्गणीभूतव्यंग्ययोर्वाच्यांगत्वादिभेदैर्यथासम्भवं समासोक्त्या-
दौ दर्शितः ध्वनिस्तु शब्दार्थालंकारस्वभावतया बहुतरप्रभेदम् तथाहि इत्यर्थपौनरुक्त्यं श-
ब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यं चेति त्रयः पौनरुक्त्यप्रकाराः आद्यो पौनरुक्त्यप्रकारश्चवनेव
क्ष्यमाणालंकाराणां कल्प्याविभागचरनार्थम् अर्थापेक्षया शब्दस्य प्रतीतावंतरंगत्वेपि प्र-
थममर्थगतानि दर्शयित्वा तत्र प्राप्तिक्रमापुनरुक्तवदाभासस्य एवं लक्षणार्थः इहेति प्राहुः प्रस्ता-
वे इति प्राहुः प्रकारत्रय शब्दादेव संख्योपरमात्सिद्धेः तत्रार्थपौनरुक्त्यं प्रत्यक्षं दोषः अनेन
वप्रत्यक्षप्रत्यक्षत्वेन द्वैविध्यम् प्रथमं हेयवचनमुपादेयाविश्रान्त्यर्थम् तद्वानेवयावत्स्थौ-
रणेयथाभासनं विश्रान्तिः प्ररोहः आमुखावभासनं पुनरुक्तवदाभासम् आमुखे ग्रहणं प-
र्यवसानेन्यथात्वप्रतिपत्त्यर्थम् लक्ष्याने दैरूप्यं तत्त्वं सकः संस्कारो लौकिकालंकारवैधर्म्ये-
ण काव्यालंकाराणामलंकारपारतंत्र्यं ध्वनन् शब्दपौनरुक्त्याच्चेत्वादेवार्थालंकारत्वं।

अ॰ स॰ स्व॰ द्व॰

ज्ञेयम् प्रभेदास्तु विस्तरभयान्नोच्यन्ते उदाह[illegible]ष्टीकारणस्तवे यथा अहीनभुजगाधी
शावशवलयकंकणम् शैलादिनंदितं वंदितं दे[illegible]पंकम् वृषपुंगवलक्ष्माणं शूलिपा
णिवलोचनम् सर्वमंगलदं नौमि पार्वतीसखमीश्वराम् दारुणःक्रोधतोजातो भस्मभूतिकरः
परः रक्तशोणोविरूपाक्षः पातुवः पावकः प्राची पतनस्तु स्वबंतापेतयातिरंतापेतयायथा
भुजंगकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः जगन्त्यपि सदापायादव्याच्चेतोहरःशिवः अत्र
पौनरुक्त्यं व्यंजनमात्रपौनरुक्त्यं च अलंकारप्रस्तावे केवलं स्वरपौनरुक्त्यमसत्कारुत्वान्न गणि
तेऽत एतद्वैविध्यम् संख्यानियमे पूर्वं छेकानुप्रासः द्वयोर्व्यंजनसमुदाययोः परस्परमनेक
धासादृश्यं संख्यानियमः पूर्वं व्यंजनसमुदायाश्रितम् यथा किंनामदुर्दुरध्वसायं
कायंनिपीडयतिनंदं दुरुघरुघव पतानिकेलिरसितानिसितकदानामाकर्णपकर्णमध्य
गाणिनलाजिनोऽसि अत्र सायंप्राह्णेस्यालंकारस्य यकारमात्रसादृश्यापेतयाद्वयमनुप्रासेन
सहैकाभिधानलक्षणःसंकरःछेकाःविदग्धाः अन्यथा तद्वृत्त्यनुप्रासः केवलंव्यंजनसा
दृश्यमेकधासत्त्वधायसादृश्यंतादीनांचपरस्परसादृश्यं अन्यथाभावःद्यानिस्तरसाविच्छयो

३

व्यापारः तदुक्तौ वर्णरचनेह व्याप्तिः सवपरुषकोमलमध्यवर्णरचनात्रिधा तदुपलालितो
यमनुप्रासः यथा श्राटोपेन परीय सायदापि सावाणीकवेरमुखे वेलं तो प्रथते तयापि तु
रूतेनोन्मनो रंजनम् नस्याथ पावदमंदसंदर्भगुणालंकाररंगकारितः सप्रसादिलसद्रसायन
रसासायानुसारी रसः यथा वा सत्ताः पन्नगफणमणिनानलाशीवानाराव पाल्पापि वारावैदोः
किरणाविष इव मुखो वघो स्ववावायवः नवेताः स्वरलाः सिताः सिततरूवः सावीक्षताः साल।
साः साक्षताः समदाः कुरंगवरास्थणी मानानानुविडाहरथाः स्वरव्यंजनसमुदायपौनरुक्त्यं यमक
म् श्रुत्यनुविद्धि नाथं तं जावि दामि नाथं तं जावि देकस्यान पौनरुक्त्यं मपरस्य सार्थकं नामितिसं।
हेपतः प्रकारत्रयं यथा योयः पश्यति तन्नेत्रे रूपविरेवनजायते नस्यातस्यान्यनेत्रे तु रूपविवे
वनजायते इदं सार्थकमेवमन्यज्ञेयम् शब्दार्थपौनरुक्त्यं पुनरुक्तदोषः सकृत्कथ्य हणावस्य
माणप्रभेदवैलक्षण्यार्थम् यदाहुः शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादादिति ।
तात्पर्यभेदवत्तु लाटानुप्रासः तात्पर्यमन्याः श्रयः तदेवाभिधानेन नत्र शब्दार्थयोः स्वरू
पम् यथा तालाजाग्रति गुणमालासंसर्गरस्परसाद्दचेतिरइकिरणान्नुमहीयाद्रहोतिक

श्र॰
स॰ स्व॰
४
५

मलाइकमलाइ तदाजायंते गुणायदाते स[…]ते रविविकेरणानुग्रहीतानिभवंति
कमलानिकमलानि ह्मः कियन्नयकथंव[…]लसल्लसत्वाब्जपत्रनयनोनयनेलमी
ल्पहेमाम्बुजेनरुणोडन्नरमापरुत्यदेवाद्विधायसहमागतइत्यर्थेहे अब्जपत्रनयनेनयने
निमील्येत्याद्यो विभक्त्यादेरपौनरुक्त्योपिबहुतरपौनरुक्त्यमालायांनुप्रासमेव कास्यंकास्या।
इत्येवमादावन्तनयेनसहासैकाभिधानलक्षणेनोसंकरः अन्येन्त्वापेतशाह्वार्थंगत।
त्वेनामात्रगतत्वेनचव्यावार्ययोतिभिन्नविषयत्वात् अनन्वयेवशाद्वैक्यसौवित्पादानुयोगि
कम् अस्मिंल्लालायांनुप्रासेसाक्षादेवप्रयोजकम् तदेवंपौनरुक्त्यपंचालंकाराः तेगदव्या
ख्यातमेतत् यो वर्णानांवृद्ध्वायथायाहूतितेहेतत्तेवित्वम् पौनरुक्त्यप्रस्तावेस्यानवेपा
चाक्षिद्ध्वर्णपौनरुक्त्यात्मकोविवक्षवचनम् यद्यपिलिप्यक्षराणांवृद्ध्वादिसान्नेवेशावि।
शेषुतं तथापि श्रोत्राकाशसमवेतवर्णात्मकशाह्वाभेदेनतेषांलोकेप्रतीतः वाचकशा
ह्वालंकारोयम् इत्यर्थः आदिग्रहणाद्यथावृत्त्यानिसम्भवंपद्मबन्धादिपरिग्रहः यथा।
भासतेप्रतिभासारसाभाताहताविभाभावितात्माशुभाभावाद्देवाभावततेसभा पबोह

द्वलपद्मबन्धः अत्र वक्तुं हृदिगलेषु निर्गमनप्रवेशाभ्यां श्लिष्टतरत्वम् अविदितगलेषु अन्यथा
नुकारिणीं कामस्य रज्जु श्लिष्टमेव उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा अर्थालंकारप्र
करणमिदम् उपमालोपमेययोरित्यत्र लौकितोपमानोपमेययोर्निर्देशार्थम् साधर्म्ये त्रयः प्रका
राः भेदप्राधान्यं व्यतिरेकादिवत् अभेदप्राधान्यं रूपकवत् द्वयोस्तुल्यत्वं यथास्यां यदाहुः।
यत्र किंचित्सामान्यं कश्चिच्च विशेषः स विषयः सदृशतायाः इति उपमैव चानेनप्रकारवैचित्र्ये
णानेकालंकारबीजभूतेति प्रथमं निर्दिष्टा अस्याश्च पूर्णालुप्तत्वभेदाद्द्वैविध्यं तत्रैवेवादि यत्र
श्रुतं न चापि साधारणधर्मस्य श्राविदनुगामितयैकरूपेण निर्देशः श्राविदस्य प्रतिवस्तुभावे
न पृथक् निर्देशः पृथक् निर्देशोऽपि सम्बन्धिभेदमात्रप्रतिवस्तूपमावत् बिम्बप्रतिबिम्बभ
वो वा दृष्टान्तवत् क्रमेणोदाहरणम् प्रभामहत्या शिखयेव दीपः त्रिमार्गयेव त्रिदिवस्य।
मार्गः संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च योऽन्यान्मुञ्चवलितकन्धर।
माननं नदाहत्वङ्नशानपत्रानि भंव हन्त्या [illegible]न्तोनरतेन नवाविद्धेन वपत्मलात्यागाम्
त्वानरस्वमेरुदयेकरातः अत्र वालितना[illegible]वितान्मात्यभेदाभिन्नेधर्माभिप्रायो बिम्बप्र

ग्रं॰ तीबिम्बत्वमेव पाण्ड्योयमंसार्पितलम्बहा[illegible]गोहरिचंदनेन आभातिबालातप
स॰ स्व॰ ५ रक्तसानुस्सनिर्झरोद्गार इवाद्रिराजः अत्रहा[illegible]योर्निर्झरबालातपयोः प्रतिबिम्बत्वेनाति
दिष्टौ एकस्यैवोपमानोपमेयत्वेऽनन्वयः वाक्याभिप्रायेणैतदुक्तं रूपान्तरमाह एकस्यैवेक
द्दथमे संसर्गो द्वितीयस्तत्रासम्बन्धावारितेति हेत्वर्थः अतएव अनन्वय इतियोगोप्यत्र सम्भवति।
यथा पुडेन्दुनोज्जेनेव प्रायेण प्रतापोभीमोपि भीम इव वैरिषु भीमकर्मा न्यग्रोधवर्तिना।
मष्याधिपतिं ऊदृणा ग्रस्यापाणनार्थमाधिजगमतद्वादूवेण द्वयोः पर्यायेण तस्मिन्नुपमेयोप
मा तत्तृप्त्याहेनोपमानोपमेयत्वप्रत्यवमर्षः पर्यायो योगपद्याभावः अतएवात्रवाक्यभे।
दः स्यंवथमेस्य साधारणप्रवस्तुप्रतिवस्तुनिर्देशोवाद्विधा यथा खामिवजलं जलमिव खं हं
सश्चंद्र इव चंद्र इव हंसः कुमुदाकारास्ताराः ताराकाराणि कुमुदानि द्वितीये यथा सज्जायाम्भो
जवदनाः सज्जायवदनाम्बुजाः वाप्योंगना इवाभान्ति पत्रवाप्यार इवांगनाः सदृशानभा।
वाद्गत्वेन रसस्यातिस्मरणम् यदभिहितं वाचैः सदृशादृष्टचिंताद्याः स्मृतिबीजस्य बोधकाः
वत्वेन तं सदृशमेव प्राविनाभावाभावात्तावन्मात्रम् यथा प्रतिपाल्येन सरासरप्रभावंशोरु

मवलोकान्नैवात्तत्परूपम् अशोकस्तनमवोद्दिष्टांश्रमणेधृतयन्तवरंशुनंदने स्मरामेव
सादृश्यंविनतत्स्यातिनायमलंकारः यथा सुधानुगोदंमगायानिहतस्तेरंगवातेनाविनी
तावेद रहस्यद्रुमसंगात्तेषांगणानृथांस्मरामिवानीरगरहेषुस्तनम् अत्रकात्स्न्यंविशेषणानां।
स्यात्तेव्यादपणाभावेतेस्यात्पंदपणाभावेतन्मसमेवोनम् प्रेयोलंकारस्यतमाटपपद्यातेरि
क्तान्तमित्रोर्योपितस्यातिविंछयो यथा अहोकोपेपिकांतं स्तवामीति तत्रापिविभवाद्या
गुरितत्तेनस्वशब्दमात्रप्रतिपाद्यतेयथा अत्रानुगोदामित्यादि येरंह्योसितदाललाटप
तितप्रासप्रहारोप्यधिस्पोतास्वन्द्धानिपातलोकनपुरोभावःपरान्पातयन्तं तेषांदुःसह।
कालदेहदहनप्रवृत्तनेत्रानलज्वालालीभरभास्वरेस्मरारिपादस्तंगतंकौतुकम् इत्यादौ
सदृशावस्तुद्वभावोपाकस्तावस्त्वंतरकरणानाविशेषालंकारः करणस्यक्रियासामान्यात्म
नोदृष्टांतेपिसम्भवात् मतंतरेकाव्यलिंगमेतत् तदेतेसादृश्याश्रयेणभेदाभेदतुल्यत्वे
लंकारानिर्णीताः सम्प्रत्यभेदप्राधान्येनकथ्यंते [illegible] अभेदप्राधान्येआरोपेआरोपाविषयानप
ह्नवेरूपकम् अत्रात्रअन्याविपआरोपः तत्समात्मनम् योषित्ब्धतादिविषयाह्नवेपकांतः अत्र।

प्र॰
स॰ स॰
८
6

ण्यादिविषयेणाविषयस्य रूपवतः कारणाद्रूपकं [illegible] विनुगतमेव यदाहुः उपमैवतिरोभू-
तभेदा रूपकमिष्यते इत्यादरोपाभेदेऽध्यवसायः [illegible]ष्यते इति पश्चात्तन्मूलालंकारविभागः
इदं तावन्निरवयवं सावयवं परंपरितं त्रिविधम्. आद्यं केवलं मालारूपकं चेति द्विधा द्वितीयं स-
मस्तवस्तुविषयमेकदेशविवर्ति चेति द्विधैव तृतीयं श्लिष्टाश्लिष्टशब्दहेतुत्वेन द्विविधं.
तत्रापि केवलं मालारूपकं चेति चतुर्विधम्. तदेवमष्टौ रूपकभेदाः अन्ये तु प्रत्येकं वाक्योक्त-
समासोक्तभेदाः संभवन्ति तेऽन्यतोऽवसेयाः क्रमेण यथा दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुंदरि नास्मि दूये उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर्यत्खिद्यते तव पदं ननु
सा व्यथा मे पीयूषप्रसृतिर्नवाम्बुजं दाचनवाल्मयेष्वङ्गं गाविमनस्कवेकवदनस्वल.
मृणालोल्लता द्विभावः स्मरकाण्डकस्याकेमापिपाणिश्चरेसागसामापणानंतनदेवातिप्राति
पदं प्रालेयभानोस्तनुः विस्तारशालिनि नभस्तलपत्रपात्रे उद्दोज्वलप्रभमसेवयभूरिभ
क्तम्. गंगातरंगायनमाहेषडगयादिमयंजगयंमयानरपतेकालिकालकर्णे आभातितेति ते
भृतः लणदाप्रभेयानिस्त्रिपामांसलतमालवनांतलेखा इड्डतिषोयुपि हठेन नवारिकीर्ती

८

गनीयपत्रमतेनतहृणः प्रतापः दीतिभूतस्य त्रालिङ्गपाहूंपर्यालेतम् किंप्रस्वस्पत्वंविनहं
तिनयनानंदंविदत्रेनवाहाद्विंवाजुषकेनेनस्य ऊहतेनालोकमात्रेणाकिम् वज्रंदीनवसत्य।
यंयदपः प्रीतांशुरम्भुक्ष्नो दर्पः स्पादमरतेन वोदहनदण्ड्स्पोवाविमबाधरे श्रुत्रवज्रोंऽद्रूपेण
हेलक्केपीमृषणामरतस्याद्विद्वपदं दूपणम् विद्वन्मानसहंसवैरिकमलासंकोवदीमद्युते उ
गोमागोलनीललोहितस्तमित्वीकारवैश्वानर सत्यप्रीतेविधपदत्वाविजयप्रापभावभीम
प्रभोसाम्राज्यंवरवीरवत्सरपातंवैरिंवपुषैः क्रियाः ग्रन्त्रमेवहंसरव्याद्यारोपणपूर्वकोमा
नसपूर्वकोमानसमिवमानसमित्याद्यारोपः श्लिष्टपाहूंमालापरम्पारितम् यामिमनोवाक्का
यैः प्रारणंकरुणात्मकंजगन्नाथम् जन्मजरामरणार्णवतरणेनरएंडहरांघ्रियुगम् पर्यंकोरा
जलत्याहरितमणिमयः पोहबाध्युलरगोभंगप्रत्यर्थवंपोल्लणाविजयवारिलपानदाना।
स्तुपदः संग्राममत्रासनताम्यन्मुरलपतियणाहसनीलाम्बुवाहः खड्गः त्वामसौविदलस्पामिते।
विजयतेमालवावाडलस्य ग्रन्त्वमासौविदलशलेपरम्पारितमापिपकदेपाविवातिपवमा
वयोपिभेदालेपानः स्पविनापव इदंवैधर्मेण[illegible]तलेवसौजन्याम्बुमरुस्थलीसंचारिताले

अ॰ स॰ स्व॰ १

त्वद्भुभिर्त्रिगुणज्योत्स्नाङ्कुरस्तवकदम्भोदसरलत [illegible] ककरा येरेषापि द्रुराश्रयाकलियुगे
राजावली सेव्यते तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् । अत्रचारोप्यमानस्य
भिन्नत्वाद्वा विषयलिङ्गेनापि श्रावितत्वतोऽसम्भवात्संख्यायोगस्यापि विषयसंख्यात्वं प्रत्येकमारोप
यत् यथाङ्गविजयरावल्कलावलम्बिनः कपिलादवानपङ्क्त्यादौ नाहिकापिलस्तुनेवं त्वस्क
त्वम् आमिमराते मरसहृदयतां प्रलयं मूर्छां तमः शरीरसादं मरणं च जलदभुजगजं प्रस
त्य करुते विविधं वियोगिनी नामित्यत्रानियतसंख्याकाकार्यं विशेषाणां योऽपि नगरलार्थं प्रभावि
तो विषयाणां ह्रोङ्गविषयवद्दलदम्बुजगजामिति रूपकस्य साधकश्चेत् एवं सिद्धत्वाभावान्न तन्निब
न्धने विषयाणां ह्रोङ्गिरूपाहं परस्परितमिति त्रिविधरूपवाचाङ्गः । आरोप्यमाणस्य प्रकृतोपयोगि
त्वे परिणामः । आरोप्यमाणं रूपके प्रकृतोपयोगित्वाभावात्प्रकृतोपरञ्जकत्वेनैव केवलं ।
नान्वयं भजते परिणामे तु प्रकृतात्मतया आरोप्यमाणस्योपयोग इति प्रकृतमारोप्यमा
णरूपत्वेन परिणमति आगमानुगमविगमख्यात्यभावात्सांख्यीयपरिणामवैलक्षण्यं ।
तस्य समानाधिकरणवैयधिकरण्यप्रयोगाद्द्वैविध्यम् आद्यो यथा नीताभूतेशमौले ।

वजनममरथनीमात्मनासौ तत्पतीयस्तस्मै सौमित्रिमैत्रीमयमुपायनवानानरंनादिकाय।
व्यामयामास तानोभिः शबरपुंवतिभिः कौतुकोदंचदंसहकक्षादन्नीयमानस्तत्र रितनमयाणीतं
विवहूरं प्रतस्थे अत्र सौमित्रिमैत्री प्रकृतारोप्यमाणसमानाधिकरणेन रूपकेन परिण
ता आतरस्य मैत्रीरूपतया प्रकृते उपयोगात् तदत्र समासोक्तावारोप्यमाणं प्रकृतोपयो
गितत्त्वारोपविषयात्मतया न त्वाध्येन मतएव तत्र तत्त्वव्यवहारसमारोपः एवमिहापि तेय
म् केवलं तत्राविषयस्यैव प्रयोगो विषयणे गम्यमानत्वात् इह तद्वयोरप्यभिधानं तदात्
मात्मतयोः परिणामित्वम् द्वितीयो यथा अत्र पांक्तिमतामुपायिवाद्विस्मरसैवंत्रापवाङ्त्रि
तैर्वचोभिः द्वितिभक्ते रुपायनं चकार प्रथमं तत्त्वरतनस्तुरंगमाद्यैः राजसंयहूनाउपायत्र
वितं तत्त्वात्र वचोरूपामिति वचसाव्याधिकरणोपायरूपत्वेन परिणामः विषयस्य संदि
ह्यमानत्वे संदेहः अभेदप्राधान्ये आरोपरस्यैव विषयः प्रकृतोप्यौयाद्विशित्वेनाप्रकृतस्सं
देहो विषयोपि संदिह्यते एवं तेन प्रकृताप्रकृतगतत्वेन काव्ये प्रतिभोत्थापितं संदेहे संदे
हालंकारः सचाविधः शुद्धो निश्चयगर्भो [illegible] तत्र शुद्धो यत्र संशयपर्यवसा

अ॰ स॰ स्व॰ ८

नम् यथा किंतारुण्यतरोरियंरसभरोद्भिन्नानवा[illegible]लीलाप्रोच्छलितस्यकिंलहरिकाला
वण्यवारांनिधेः उद्गाढोत्कलिकावतांस्वसमयोपन्यासविस्रम्भिणः किंसाक्षादुपदेशय
ष्टिरथवादेवस्यशृंगारिणः निश्चयगर्भोयः संशयोपक्रमोनिश्चयमध्यः संशयान्तश्च यथाअ
यंमार्तण्डः किंसखलुतुरगैःसप्तभिरितः कृशानुः किंसर्वाःप्रसरतिदिशोनैषनियतंकृ
तान्तः किंसाक्षान्महिषवहनोसाविति चिरंसमालोक्याजौत्वांविदधतिविकल्पान्प्रतिभ
टाः निश्चयान्तोयत्रसंशयोपक्रमोनिश्चयपर्यवसानो यथा इन्दुः किंक्वकलंकः सरसिजमेत
त्किमम्बुकुत्रगतम् ललितसविलासवचनैर्मुखमितिहरिणाक्षिनिश्चितंपरतः आविद्धा
रोप्यमाणानामभिन्नाश्रयत्वेनदृश्यते यथा रंजितानुविविधास्तरुशैलानामितंनुगगनं
स्थगितंनु पूरितेवविषमेषुधरित्रीसंहृतानुककुभस्तिमिरेण अत्रारोपविषयेतिमिरेणगा
हितत्वादिभिन्नाश्रयत्वेनारोपितानाम् केचित्तुअध्यवसायाश्रयेणमंसंदेहप्रकारमाहुः अन्ये
त्वन्यथाहुस्तस्यसम्भावनात्मकत्वेनमनोत्प्रेक्षाप्रकारमध्यमावहन्ते सादृश्याद्वस्त्वन्तरप्रती
तिर्भ्रान्तिमान् असम्यग्ज्ञानत्वसाधर्म्यात्संदेहानन्तरमस्यलक्षणं भ्रान्तिश्चित्रधर्मोविच्छि

नेयसंभ्रमेणाते स्वकारेसभ्रांतिमान् सादृश्यप्रयुक्तावभ्रांतिरस्याविषयः यथा ओष्ठेबिम्बफला
प्रायालमलके छत्पाव जम्बूधियाकर्णेलेहाते भाजि दाडिमफलफलभ्रांत्यावघ्रोणेमणी
निघृन्यासह इत्यलङ्कदृष्टणामान्तलामानां मरीराजगुञ्जे रराजपंजर कैसरशस्तघामूर्ध्वं
नम् गास्तमन्मप्रहारादेनान्तभ्रांतिनोस्यालंकारस्याविषयः यथा दामोदरकराघातचूर्णे
नाशोघवदसा इत्तेंवाणेरमलेनशांतवंइनभस्तलम् सादृश्यहेतुकापिभ्रांतिर्विच्छित्यर्थे
काविप्रांतिभेयांपि नैवगृह्यते यथा दारुतैलस्वरसोप्यांपितानुभ्रांत्रिकारजनवत् एवं स्या।
एवं स्यात्तुरूपेवेति संशयेपि बोद्धव्यम् एकस्यापि निमित्तवशादनेकधा ग्रहणं उल्लेखः।
यत्रैकं वस्त्वनेकधा गृह्यते सरूपबाहुल्योल्लेखवानुल्लेखः नवेदं निनिमित्तमुल्लेखमात्रमपि
तु नानाविधधर्मयोगित्वाख्यनिमित्तवशादेतद्विद्यते तत्र बहुत्वार्थेन ग्रहीतृत्वमेवायथायोग
प्रयोजिकाः तदुक्तं श्रीप्रत्यभिज्ञायाम् यथारुचियथार्थित्वं यथाव्युत्पत्ति भिद्यते आभासोप्य
थएकस्मिन्ननुसन्धानसाधिते इति यथा यत्तपोवनमिति मुनिभिः कामायतनमिति वे।
श्याभिः संगीतशालेति लास्यकैः इत्यादि श्रीकण्ठ...नपदवर्णने अत्रैकमेव श्रीकण्ठ।

अ॰
स॰ स॰
५

त्त्वेन गुणयोगात्तपोवनाद्यनेकरूपतयोल्लेखः [illegible] कच्चार्थित्वश्रुतत्त्वयच्छात्रपायप्रोय
ग्यायोगे समस्तव्यस्ततायोजनायेत्तत्प्राकारान्ते वार्त्तिकारेण सांधिको इति मंत्वः सांधिकोत्रास्तु रावे
वरव्यसनी नन्व तन्मध्ये वज्रपिंजरमिति पारणागतेरस्वरादिव रमिति वार्त्तिकैरन्यादौ रूप
कालंकार इति कथमयमुल्लेखालंकारविषय इति सत्यं अस्ति तावत्तपोवनमित्यादौ रूपक
विभक्तोस्य विषयः यत्र वस्तुतस्तद्रूपतायाः सम्भवः यत्र तु रूपकं स्यात् उक्तचोदितमारोभ
तिसम्भाविनी तत्संकरोस्तु नेतावतास्याभावः प्राकनेवट्टे ननश्च न दोषः काश्चिदेवं हि त
त्र भ्रांतिमदलंकारोस्तु अतद्रूपस्य तद्रूपताप्रतीतिनिबन्धनाभावात् नैतत् अनेकदायह
णाव्यस्यापि णायस्या पूर्वं सभावात् यद्वेत्तकात्वाच्यास्यालंकारस्य संकरप्रवृत्तिस्तंगीकृतैव
यद्येवमभेदे भेद इत्येवं रूपातिशयोक्तिरत्रास्तु नैष दोषः ग्रहीतृभेदाख्येन विषयाविभागे
नानेकधात्वोट्टंकनात् न स्यवावेभिव्यनंतररूपत्वात् सर्वथान स्यांतभावः प्राकाश्चिय इते
निश्चयः यथावा नारायणोत्रि पारणश्रवश्याहि सिणिबलहहोन्नितरुणीहिंबायणाइ इति प
रिणतवपूर्भिः श्रीवल्लभ इति तरुणीभिः बालाहितत्र कोहलेण पसेअसच्चाविओ पवंदृण्ड

हास्मिगुहेवंवासिग्रस्तनेयप्रासीत्यादावध्यवसेयम्। इयांस्तुविशेषः पूर्वत्रगृहीतभेदानानेक
धारोल्लेखः इहतुविषयभेदेन ननुयंल्लेखइतिकथमलंकारामत्रख्याप्यते सत्यमनेकधा
त्वरितेनतुविच्छित्त्यन्तरंदर्प्यते इतिनत्वप्रतिभोत्पत्तिहेतुः प्रवोवस्यात् ननुसर्वथा तदभावः
ग्रस्तत्त्वालंकारान्तरम्। यदेवंविधेविषयेल्लेखाभावेपिविच्छित्तिसम्भवः तस्मादेवमादावुल्ले
खएवश्रेयान्। एवमलंकारान्तरविच्छित्त्याश्रयेणायमलंकारोनिर्देपणीयः विषयापह्नवे
पह्नुतिः वस्त्वन्तरप्रतीतिरेव प्रक्रान्तानपह्नववैधर्म्येणोद्भाव्यते आरोपस्तावदारोपवि।
षयापह्नवारोप्यमाणप्रतीतावपह्नुत्याख्योलंकारः तस्यत्रयोबन्धच्छाया अपह्नवपूर्वक।
आरोपः आरोपपूर्वकोपह्नवः छलादिपदैरसत्यत्वप्रतिपादकैर्वापह्नवनिर्देशः पूर्व।
कभेदद्वयेवाक्यभेदः तृतीयभेदेत्वेकवाक्यत्वं आद्योयथा यदेतच्चन्द्रान्तर्जलदलवलीलां
प्रकुरुतेतदाचष्टेलोकः शशकइतिनोमांप्रतितथा अहंत्विन्दुंमन्येत्वदरिविरहाक्रान्ततरुणीक
टाक्षोल्कापातव्रणकिणकलंकांकिततनुम्। अत्रत्वैवंदैवस्यशशकस्यापह्नवेऽपास्तेमेशावक
प्रतीतवस्तुकिणवत इंदोरारोपोनन्वयमयदानांप्रधानं ...तेनातिरवधानत्व। ननुयथा पूर्वोदोःपरि

अ
सं॰ स्व॰
१॰

पोषकान्तवपुषः स्फारप्रभाभास्वरं नेदं मण्डलम[illegible]तिगगनाभोगो जितमीशो जगत् मारस्यो
ज्झितमानपरमधुना पाण्डुप्रदोषाश्रिया मानोन्नद्धजनाभिमानदलनोद्योगैकहेवाकिनः
द्वितीयो यथा विलसदमरनारीनेत्रनीलाब्जखण्डान्यधिवसति सदा यः संयमाधःकृतानि
न तु ललितकलापे वर्त्तते यो मयूरे वितरतु स कुमारो ब्रह्मचर्यश्रियं वः। तृतीयो यथा उन्न।
श्रांतो ज्जितगेहराजं रवधूकम्पाङ्कलोस्वैः ङ्कवश्रेणिवेलामलहारवल्लिविगलन्मुक्ताफलच्छ
द्मना साधं मनाङ्पुंभिस्त्वदीययशसां स्मृत्नेमसौधावतानाभ्रहेराजमरुगाकङ्कं दमुङ्कलस्थलैः प्र
मान्मुःकर्णैः अत्रकृतनस्थाने मन्ये शब्दप्रयोगे सापह्नवोत्प्रेक्षास्यापायेश्वते अहं तिर्दृमन्ये
शतैवाकभेदे मन्यपाहृप्रयोगेनोत्प्रेक्षानोत्पिवद्वपने नास्मिन्नपिभेदे अपह्नवारोपयोः पौर्वा।
पर्यं प्रयोगपर्याये भेदद्वयं सदापि न एवं वाश्चित्रतावहामिति न भेदत्वेन गणितं नत्वापह्नवप्र
वंके आरोपे पानेरंतरमुदाहृतम्। आरोपपूर्वके नपह्नवे यथा ज्योत्स्नाभस्मच्छुरणधवला बि
भ्रती तारकास्थीन्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम्। द्वीपाद्द्वीपं भ्रमति दधती च
न्द्रमुद्राकपाले न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेनेति कुविद्धनरसत्पारंवस्तंनरहप।

ताभिधायिवपुःशब्दादिनिबन्धनम् यथा अनुखिंलावण्यामृतसरसि नूनं मृगदृशः स्मरः
शर्वप्लुष्टः पृथुजघनभागे निपतितः यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे शिखा धू-
मस्येयं परिणमति रोमावलिवपुः इत्येवमभेदप्राधान्ये आरोपगर्भानलंकारांल्लक्षयित्वा।
ध्यवसायगर्भांल्लक्षयति तत्राध्यवसाये व्यापारप्राधान्ये उत्प्रेक्षा विषयनिगरणेनाभेद
प्रतिपत्तिर्विषयिणोध्यवसायः स च द्विविधः साध्यः सिद्धश्च साध्यो यत्र विषयिणोसत्य
तया प्रतीतिः असत्यत्वं च विषयगतस्य धर्मस्य विषयउपनिबन्धे विषयिसम्भवित्वेन वि
षयासम्भवित्वेन च प्रतीतेः धर्मो गुणक्रियारूपः तस्य सम्भवासम्भवप्रतीतौ सम्भवाश्च।
यस्य तत्रापरमार्थतयासत्यत्वं प्रतीयते इति तस्य तत्परमार्थतयासत्यत्वं यस्यासत्यत्वं तस्य
सत्यत्वप्रतीतावध्यवसायः साध्यः अत एव व्यापारप्राधान्यं सिद्धो यत्र विषयिणो वस्तुतो
सत्यस्यापि सत्यतया प्रतीतिः सत्यत्वत्वच पूर्वोक्तस्यासत्यत्वस्याभावात् अत एवाध्यवसि
तप्राधान्यं तत्र साध्यत्वप्रतीतौ व्यापारप्राधान्येऽध्यवसायः संभावनमभिमानस्तर्कं ऊह
उत्प्रेक्षेत्यादिशब्दैरुच्यते तदेवमप्रकृतगतगुणक्रियाभिसम्बन्धादप्रकृतत्वेन प्रकृतस्य।

ग्र॰ ल॰ स्व॰ ११

संभावनमुत्प्रेक्षा सा च वाच्यैवादिष्टाहेत्युच्यते प्रतीयमानायां पुनरिवाद्यप्रयोगः सा च जा
तिगुणक्रियाद्रव्याणामप्रकृतानामध्यवसेयत्वेन चतस्रो प्रकृतस्य तद्रूपयोगोपि न वैचित्र्य
मिति तेन गणिताः प्रत्येकं च भावाभावाभिमानरूपतया द्वैविध्येऽष्टविधत्वं भेदाष्टकस्य च प्र
त्येकं निमित्तस्योपात्तानुपात्तत्वाभ्यां द्वात्रिंशत्प्रकाराः ते च प्रत्येकं हेतुस्वरूपफलोत्प्रेक्षणरूप
त्वेन षण्णवतिर्भेदाः एवा गणिता वाच्योत्प्रेक्षायाः तत्रापि द्रव्यस्य प्रायः स्वरूपोत्प्रेक्षणमेवेति ।
हेतुफलोत्प्रेक्षाभेदास्तत्र पातनीयाः प्रतीयमानायां यद्यपि ऽइवाद्यनुपात्तत्वेनो भेदास्तथा
पि निमित्तस्यानुपादाने तत्स्यां न सम्भवतीति नैर्भेदैक्यं नोयं प्रकारः इवाद्यनुपादाने निमि
त्तस्य चानुपादाने ऽत्प्रेक्षणस्य चानिष्टमाणकत्वात्स्यायच्चाद्यस्वरूपोत्प्रेक्षा न सम्भवति तदेवं ।
प्रतीयमानोत्प्रेक्षाया यथासम्भवं भेदा निर्दिष्टाः एषा वाच्याश्रयापि यथा मे विषयेष्विष्टप्राह
हेत्वाख्या वितनुष्यते स्वावित्यादावर्थान्वयवेलायां सारूप्याभिधानादुपक्रान्तापुनरुपमा वा ।
क्यार्थतात्पर्यसामर्थ्यादभिमतत्वव्यापारोपारोहक्रमेणोत्प्रेक्षायां पर्यवस्यति उत्तावेक्षकला
दिष्टाहप्रयोगे सा पङ्क्तिवोत्प्रेक्षा भवति अतश्चोन्नवदयमाणप्रकारवैविध्येणानन्त्यमस्याः ।

11

॥

साम्प्रतं तद्वैचित्र्यं दिक्मात्रेणोदाह्रियते तत्र जात्युत्प्रेक्षा यथा स वः पायादिंदुर्नवबिसलता
कोटिकुटिलः स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः स्रवन्मन्दाकिन्याः प्रतिदिवससि
क्तेन पयसा कपालेनोन्मुक्तः स्फटिकधवलेनांकुर इव अत्रांकुरप्राह्वस्य जातिप्राह्वत्वाज्जाति
रुत्प्रेक्ष्यते क्रियोत्प्रेक्षा यथा लिम्पतीव तमोंगानि वर्षतीवांजनं नभः अत्र लेपनवर्षणे ।
क्रिये तमोगतत्वेनोपमेयेनोत्प्रेक्ष्यते न तेनोत्प्रेक्ष्यते उत्तरेणार्थे असत्स्वरूपसेवेव दर्शिते ।
छकलतां गतेन त्वत्रोपमेयेनोत्प्रेक्षिता गुणोत्प्रेक्षा यथा एषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया ।
न्नूपुरमेकमुर्व्याम् अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् अत्र दुःखं गुणः ।
द्रव्योत्प्रेक्षा यथा पातालमेतन्नयनोत्सवेन विलोक्य शून्यं मृगलांछनेन इहांगनाभिः ।
स्वमुखच्छलेन कृताम्बरी चन्द्रमयीव सृष्टिः अत्र चन्द्रस्यैकत्वान्न द्रव्यत्वम् एतानि भावाभिमा
नोदाहरणानि अभावाभिमानेन यथा कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ अपश्य
न्ताविवान्योन्यमीदृक्षां क्षामतां गतौ अत्रापश्यन्ताविति क्रियायाः अभावाभिमानः एवं जा
त्याद्यभावेप्युत्प्रेक्षम् गुणस्यानिमित्तत्वं यथा नवबिसलताकोटिकुटिल इत्यादौ कुटिलत्वस्य क्रि ।

अ॰ यायायथा ईदृशां तामनोंगनाविन्यत्रदामनेता[illegible]मतस्य निमित्तोपादानस्यैतदुदाहरणं अ
स॰ ख॰ नुपादाने लिम्पतीव तमोंगानीत्याद्युदाहरणम् हेतूत्प्रेक्षा यथा विश्लेषदुःखादिव बद्धमौ।
१२ नमित्यादौ स्वरूपोत्प्रेक्षा यथा ऊवेरज्जुष्ठादिणामुल्लसन्मौगितं प्रहृत्ये समयं विहुलख्या दिदसति
12 णागन्यवहत्त्वेनव्यलीकान्तैः श्वासमिवोत्सृजते फलोत्प्रेक्षा यथा बालस्यपञ्जोतिपला।
यितस्यभालनवेकावकेनोवनांनाः अस्यापिकेवानभविष्यतीतिविपाटयं सञ्छमिवाह
तानि एवंवाच्योत्प्रेक्षाया उदाहरणानि गम्या प्रतीयमानोत्प्रेक्षा यथा महिलासहस्रभरिते
नवहृदये सुभगसाअमान्ती दिवसमनन्यकर्मा अंगंतनुकमपितनुकरोति अमाघंतीत्य।
त्रावर्तमानेवेति तनूकरणहेतुत्वेनोत्प्रेक्षितम् एवंभेदांतरेषु सेयं श्लिष्टहेतुर्यथा अनन्त।
सामान्यतया प्रसिद्धरूपा गीतिर्गीतोजगतीतलेयः अभूदहं एकिंकयागतानामतीवभूमि:
स्मरमार्गणानाम् अत्रगमनधर्मविषयेमार्गणशब्दः श्लिष्टः उपमोपक्रमोत्प्रेक्षा यथा क
स्तूरीतिलकांति भालफलके देव्या मुखाम्भोरुहे रोलम्बांतिततमालबालमुकुलोत्तंसंसतिमौ
लावपि कर्णयाविन्दुकवोत्पलांति ऊचयोरेकैव कालागुरुस्यामातितकृण्यमेत्ननत्वाशिवं।

श्रौतक एवकारातिशयः अत्र यद्यपि सर्वप्रातिपदिकेभ्य आचारे क्विबुपमानादाचारे विधावामुक्त्व उप
माप्रतीतिः तथाप्युपमानस्य प्रकृते संभवो विषयेऽनेकशेषतायां पर्यवसानम् य
थावा विरहवर्णने के एतायित्तमंगदेहस्तित्यादौ एवं च समस्तोपमा प्रातिपदिकाविषयेपि ह
वंवांरनवांतिके साहित्यमीमांसायां वचनेषु तेषु प्रदेशेषु दर्शयन्ता रहस्ये ग्रन्थविस्तारभया
न्न प्रपंचिता सापह्नवोत्प्रेक्षा यथा गतासतीरं तितिमिच्छन्नेन ससमुद्रं पौरविलासिनीषु
यत्रोल्लसत्येन ततोति कलेन सनीनाहहासे वा विभाति सन्ध्या अत्रेव शब्द माहात्म्यात्संभाव
नम् कलशब्दप्रयोगात्पह्नवो गम्यते एवं च स्यादिप्रयोगे ऽपमैवेयम् तत्प्रयोगे तु प्रकृत
स्यार्तपाकपास नप्रतीतावध्यवसायसंभवादिवशब्देन वक्तस्य साध्यत्वप्रतीतावुत्प्रेक्षैवे
वेयम् इवशब्दाप्रयोगे तु असिद्धत्वादध्यवसायस्यातिशयोक्तिः अपरशब्दस्यापि प्रयोगे
तद्रूपकम् तदेवं प्रकारवैविध्येणावस्थिताया उत्प्रेक्षाया हेतूत्प्रेक्षायां यस्य प्रकृतस्य भाव
नो धर्मस्य हेतुत्वमुत्प्रेक्षते तत्र स धर्मो ऽध्यवसायात्मिकाया उत्प्रेक्षाया निमित्तत्वेनाश्रीयते सर्ववाक्य
पर्यवसाननियमेन अन्यथाऽप्रतिसहेतुः स्यात् यथा अपण्डितां विद्वान्योऽन्यमित्यादावत्र।

प्र॰
स॰ स्व॰
१२
13

कपोलयोः प्रहृतयोस्सम्बन्धित्वेनोपात्तस्य ताम्रतागमनस्य हेतुत्वदर्पेनम्रत्वेनोदितम् हेतु
फलं च तत्र ताम्रतागमनं निमित्तं एवमरूपणतव स्वरणारविंदाविश्लेषङः स्वादिवबहुमौन
मित्यत्र नूपुरगतस्य मौनित्वस्य हेतुः इष्टितं श्रुत्वोदितं उक्तेदाणे मौनित्वमेवानिमित्तं तेयम्
एवं सर्वत्र स्वरूपोत्प्रेक्षायां यत्र धर्मो धर्म्यन्तरगतत्वेनोत्प्रेक्ष्यते न तत्र धर्मो निमित्तभूतः क्व।
चिन्निर्दिश्यते यथा सवः पायादिं दुरित्यादौ अत्र उरुहिलत्वादिनिर्दिष्टमेव वेलवेगागसा
गरस्योत्पादौ संक्षोभकारित्वादिगम्यमानम् यत्र धर्म एव धर्मिगतत्वेनोत्प्रेक्ष्यते तत्रापि नि
मित्तोपादानानुपादानाभ्यां द्वैविध्यं उपादाने यथा प्राप्याभिषेकमेतास्मिं प्रातितिह्यासातिह्वि
षाम् एकस्येलोकमानस्याभयाविह्वलितेव भूः अत्र भूगतत्वेन विह्वलितत्वाख्यधर्मोत्प्रे।
क्षायां कम्पादिनिमित्तमुपात्तम् अनुपादाने यथा लिम्पतीव तमोङ्गानीत्यादौ अत्र तमो
गतत्वेन लेपनक्रियाकर्तृत्वोत्प्रेक्षायां व्यापनादिनिमित्तं गम्यमानं व्यापनादौ भूत्वेता
विषयेनिमित्तमनुपादने षंस्यात् न च विषयस्य गम्यमानत्वे युक्तम् तस्योत्प्रेक्षितेनाधार।
त्वेन प्रस्तुतस्याभिधानत्वाविनत्वात् तस्मात्पुष्पोक्तमेव साध्य फलोत्प्रेक्षायां यदेव कार।

णांतदेवानिमित्तं तस्यानुपादानेऽकस्यचित्फलत्वेनोक्तं स्यात् तस्मान्नेतत्तस्यानिमित्तस्योपादा
नमेवं तत्प्रकारान्तरम् यथा च रथस्थितानां परिवर्तनाय प्रवर्त्तमानानामेव वाहनानाम् उ
त्थाने भूमौ तुरगोत्तमानां दोषो प्रवृत्तस्यैवाविरुद्धरस्याम् अत्र परिवर्त्तनस्य फलस्यान्तरादिकस्य
मनेकारणमेवानिमित्तमनुपादानम् तदस्ताद्यवहेलायां कल्पा विभागः प्रत्युदाहृतोपिलदपेड
रवधानत्वादिह न प्रपंचितः अस्याश्चैवादिप्राहुर्वन्मन्ये प्राहोपि प्रतिपादकः किंतु स्वेता।
सामग्र्यभावे मन्ये प्राहुः प्रयोगो वितर्कमेव प्रतिपादयति यथोदाहृतं प्राक् अहंविंदुमन्ये।
त्वदीयविरहेत्यादि एवमध्यवसायस्य साधनायामन्येतां निर्णीयसिद्धत्वेनिप्रायोन्निलद
यति अध्यवसितप्राधान्येति प्रायोक्तिः अध्यवसाये त्रयं सम्भवति स्वरूपं विषयो विषयी च
विषयस्याहि विषयिणोतातिगीणत्वेध्यवसायस्य स्वरूपोर्थानम् तत्र साधनत्वे स्वरूपप्राधा
धान्यं सिद्धत्वे त्वध्यवसितप्राधान्यम् विषयप्राधान्यमध्यवसायेनैव सम्भवति अध्यवसि
तप्राधान्येति प्रायोक्तिः अस्याश्च पंचप्रकाराः भेदेऽभेदः अभेदे भेदः सम्बन्धे सम्बन्धः अस
म्बन्धे सम्बन्धः कार्यकारणयोः पौर्वापर्यविध्वंसश्च तत्र भेदेऽभेदो यथा कमलमनन्यासि।

अ॰
स॰ स॰
२४

कमले च कुवलये तानि च कनकलतायाम् सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्॥ अत्र
मुखादीनां कमलाद्यैर्भेदेऽप्यभेदः। अभेदे भेदो यथा। अण्णं लडहत्तणअं अण्ण च्चिअ का वि वत्त-
णच्छाआ। सामा सामण्णपआवइणो रेह च्चिअ ण होइ॥ अत्र लडभावादीनामभेदेऽप्यन्यत्वेन भेदः।
यथा वा। अण्णाअणो च्चिअ परणम्रबम्राहिं सिरिवल्लहो होन्ति तरुणीहिं बालाहिं उण कोहूहलेण प-
मेम्म सच्चाविरे। अत्राभिन्नस्यापि विषयविभागेन भेदो नोपनिबन्धः। सम्बन्धेऽसम्बन्धो यथा।
लावण्यद्रविणव्ययो न गणितः क्लेशो महान् स्वीकृतः स्वच्छन्दस्य सुखं जनस्य वसतश्चिन्तानलो
दीपितः। एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता कोऽर्थश्चेतसि वेधसा विनिहितस्त-
न्व्यास्तनुं तन्वता। अत्र लावण्यद्रविणव्ययसम्बन्धेऽप्यसम्बन्धस्तन्वीलावण्यप्रकर्षप्रति-
पादनार्थं निबद्धः। यथा वा। अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः शृङ्गारैकरसः स्व-
यं नु मदनो मासो नु पुष्पाकरः। वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभ-
वेन्मनोहरमिदं रूपं पुराणो विधिः। अत्र पुराणप्रजापतिनिर्माणसम्बन्धेऽप्यसम्बन्ध उक्तः।
असम्बन्धे सम्बन्धो यथा। पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्। ततो नु

अयांद्विघटस्य तस्यात्मा मौख्यपर्यस्ते रुचः स्मितस्य अत्र सम्भावनया सम्बन्धः यथा वा दाहोम्भ
प्रसृतिम्पचः यवांवाष्पः प्रणालोचितः श्वासाः प्रेङ्खितदीप्रदीपलतिकाः पाण्डिम्नि मग्नं वपुः
किंचान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने हस्तछत्रनिरुद्धचन्द्रमहसस्तस्याः स्थिति
र्वर्त्तते अत्र दाहादीनामम्भःप्रसृत्यादैर सम्बन्धोपि सम्बन्धासिद्धत्वेनोक्तः कार्यकारणपौर्वा
पर्यविपर्ययः पौर्वापर्यविध्वंसात्तुल्यकालत्वाद्वा विपर्ययो यथा हृदयमधिष्ठितमादौ मा।
लत्याः कुसुमचापबाणेन चरमं रमणीवल्लभलोचनविषयं त्वयापतनता तुल्यकालत्वं यथा।
अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः अयमायातः कालो हन्त हताः पथि
कगेहिन्यः पञ्चपंचस्वभेदेष्वभेदे भेदादिवचनं लोकातिक्रान्तगोचरम् अत्र चातिशयाख्येय।
त्फलं प्रयोजनं तन्निमित्तं तत्राभेदाध्यवसायः तथाहि कमलमनम्भसीत्यादौ वदनादीनां।
कमलाद्यैर्भेदेपि वास्तवे सौंदर्येकाविसमर्पितेन सौंदर्येणाभेदेनाध्यवसितं भेदेभेदवचनस्य
निमित्तम् तत्रासिद्धोध्यवसाय इत्यध्यवसितप्राधान्यम् तत्र वदनादीनां कमलादिभिरभेदा
ध्यवसायो योजनीयः अभेदे भेद इत्यादिषु प्रकारेष्वपि तथाहि अंणं लहहत्तणअं इत्यादौ सा

अ॰
स॰ स्व॰
१५
15

तिपाद्यं लक्ष्याभावान्नातिभिन्नत्वं तद्भेदेनाप्यवस्थितं एवमन्यत्र ज्ञेयम् तदभिप्रायेणैवाप्यवस्थितप्र
धानत्वम् प्रकारपंचकमध्यात्कार्यकारणभावेन यः प्रकारः स कार्यकारणताश्रयालंकारप्र
स्तावे प्रपंचार्थं लक्षयिष्यते एवमध्यवसायाश्रयमलंकारद्वयमुक्त्वा गम्यमानौपम्याश्रयालं
काराः इदानीमुच्यन्ते तत्रापि पदार्थवाक्यार्थगतत्वेन तद्द्वैविध्ये पदार्थगतमलंकारद्वयमुच्य
ते औपम्यस्य गम्यत्वे पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां समानधर्माभिसम्बन्धे तुल्ययो
गिता इवाद्यप्रयोगे औपम्यस्य गम्यत्वं तत्र प्राकरणिकानामप्राकरणिकानां वा समानगुणक्रि
याभिसम्बन्धे त्वेनार्थात्तुल्ययोगिता सञ्जातपत्रप्रकराञ्चितानि समुद्वहन्ति स्फुटपाटल
त्वम्। विकस्वराण्यर्ककरप्रभावाद्दिनानि पद्मानि च वृद्धिमीयुः अत्र शरत्तद्वर्णनस्य प्रक्रान्तत्वा
त् दिनानां पद्मानां च प्रस्तुतत्वं वृद्धिगमनं क्रिया एवं गुणेऽपि योगपट्टो जटाजालं तारवी त्वक्
मृगाजिनम्। उचितानि नवाङ्गे ऽपि यदि भूतिस्तदुच्यताम्। उचितत्वं गुणः। अप्राकरणिकानां य
था धावत्त्वदश्वपृतनापातेन तं सर्वे स्यानि निरुन्नीलनलिनच्छदकोमलांगया भ्रमत्सगजे
न्द्ररूपस्य रजः कयापि तन्न्याननवासितं लतया चयशः प्रसरहत्वम्। अत्र गजेन्द्रप्रतिनायिकास्य।

लतयोरप्राकरणिकत्वम् प्रमाजेनेक्रिया गुणेयथा त्वदंगमार्दवं द्रष्टुः कस्यचित्तेनभासते मा
लतीशशभृल्लेखाकदलीनांकठोरता कठोरत्वंगुणः एवमेषाचतुर्विधाव्याख्याता प्रस्तुताप्र ।
स्तुतयोर्धर्मस्तत्रैवतुल्ययोगितांप्रतिपादयत्समस्तस्यदीपकमुच्यते प्रस्तुताप्रस्तुतानांदीपकम् उ
पम्यस्यगम्यत्वमित्यादनुवर्तते प्राकरणिकाप्राकरणिकमध्यादेकत्रनिर्दिष्टः समानोधर्मः ।
प्रसंगेनान्यत्रोपकाराद्दीपनाद्दीपसादृश्याद्दीपकालंकारोर्थादेकः तत्रैवाद्यप्रयोगादुपमा ।
नोपमेयभावोगम्यमानः सचवास्तवएव पूर्वत्र शुद्धप्राकरणिकत्वे शुद्धाप्राकरणिकत्वेवावै
वाहिकः प्राकरणिकताप्राकरणिकत्वप्रभावितत्वादुपमानोपमेयत्वस्यानेकस्यैकक्रियाभिस
म्बन्धाद्दीपकत्वात्पदार्थगतोक्तिः वस्तुतस्तुवाक्यार्थत्वेप्यादिमध्यान्तवाक्यगतत्वेनधर्मस्यह
त्रावादिमध्यान्तदीपकाख्यास्त्रयोभेदाः क्रमेणोदाहरणं रेहइमीहिदेणाश्चरसेणकुव्वसदेण
णोवणम् प्रमपवधुणीथवलोत्तमपणरणाहभुवणाभिणम् संचारएताभिर्दिगंतराणिक्र
मादिनांतेनेलयायगंतम् एवक्रमेपल्लवरागताम्राप्रभापतंगस्यमुनेस्वयेनः किंवणा
एंधणंणागाणंफणामणीकेसराइसीहाणो कुलबालियाणं थणाकभोक्ष्मयपानित्रप्रत्याले

अ॰
स॰ स्व॰
१९
16

एवमेकक्रियं दीपकद्वयं निर्णीतम् अत्र च यथानेककारकगतत्वे नैकक्रियं दीपकम् तथानेक
क्रियागतत्वे नैककारकमपि दीपकम् साधूनामुपकर्तुं लक्ष्मीं धर्तुं विहायसा गन्तुम् न कुतू
हलिकस्य मनश्चरितं च महात्मनां श्रोतुम् अत्रोपकरणाद्यनेकक्रियाकर्तृत्वेन कुतूहलिवि
शिष्टं मनो निर्दिष्टम् क्रियान्तरेण मालादीपकं प्रस्तावान्तरे लक्षयिष्यते वाक्यार्थगतत्वेन सा
मान्यस्य वाक्यद्वये पृथक् निर्देशे प्रतिवस्तूपमा पदार्थाख्यो वा वाक्यार्थं इति पदार्थगतालंका
रानेन्तरं वाक्यार्थगतालंकारप्रस्तावः तत्र सामान्यस्य धर्मस्य स्वशब्दोपादाने सकृन्निर्देश उप
मा वस्तुप्रतिवस्तुभावेनासकृन्निर्देशे सैव स्वशब्दानुपादाने सकृन्निर्देशे दीपकं तुल्ययोगिता ।
असकृन्निर्देशे तु शुद्धसामान्यरूपत्वं बिम्बप्रतिबिम्बभावो वा आद्यः प्रकारः प्रतिवस्तूपमा व ।
स्तुतः शब्दस्य वाक्यार्थवाचित्वे प्रतिवाक्यार्थमुपमासाम्यमिति अन्वर्थाश्रयणात् केवलं का
व्यसमयात् पर्यायान्तरेण पृथक् निर्देशः द्वितीयप्रकाराश्रयेण दृष्टान्तो वक्ष्यते तदेवमौपम्याश्र
येणैव वस्तुप्रतिवस्तूपमा यथा चकोर्य एव चतुराश्चंद्रिकाचामकर्मणि अवंत्या एव निपुणा ।
सुदृशो रतनर्मणि अत्र चतुरत्वं साधारणो धर्म उपमानवाक्ये निपुणपदेन निर्दिष्टः न केवल ।

मियं साधर्म्येण यावद्वैधर्म्येणापि यथा द्वैवोत्तरार्थस्यानेवं विनावन्तीनेनं गुणाः स्तद्गोरस्त मेणोत्ता
द्विपात्वे तस्यापि बिम्बप्रतिबिम्बतया दृष्टान्तत्वे प्राप्ते दृष्टान्तः तस्यापि न केवलमुपमानोपमे
ययोस्तत्प्राह्नेन सामान्यधर्मस्य लाति साधर्म्येः प्रापवमस्तुः स्रयमपि साधर्म्यवैधर्म्याभ्यां द्विविधः
प्राप्योयथा अब्धिर्लंघित एव वानरभटैः किं त्वस्य गम्भीरतामापातालनिमग्नपीवरतनुर्जा
नाति मन्थाचलः दैवीं वाचमुपासते हि बहवः सारं तु सारस्वतं जानीते नितरामसौ गुरुकु
लक्लिष्टो मुरारिः कविः अत्र यद्यपि तानानाख्येयवकोपि धर्मो निर्दिष्टः तथापि न तन्निबन्धनमौप
म्यं विवक्षितम् यन्निबन्धनं वा वैवक्षितं तत्राब्धिलंघनादावस्येव द्दिव्यवागुपासनादिना प्र
तिबिम्बनम् द्वितीयो यथा कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो रयः तमो
सि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलिताम् अत्रापि हतत्वादेः स्थानादिनावै
धर्म्येण प्रतिबिम्बनम् सम्भवतासम्भवता वा वस्तुसम्बन्धेन गम्यमानं प्रतिबिम्बकरणमिति
दृष्टान्ता बिम्बप्रतिबिम्बकरणप्रस्तावेनास्याः लक्षणं तत्र क्वचित्सम्भवन्नेव वस्तुसम्बन्धः स्व
सामर्थ्याद्बिम्बप्रतिबिम्बभावं कल्पयति क्वचित्तु नरान्वयबाधादसंभवद्वस्तुसम्बन्धेन प्रति

अ॰
स॰ स॰
१२
17

बिम्बनमाक्षिप्यते सम्भवद्वस्तुसम्बन्धयथा चूडामणिपदे धत्ते यो देवं रविमागतम् सतां का-
योऽतिशयोऽतिबोधयं गरहमेधिनः अत्र बोधयन्निति णिजन्तसमर्थाचरणे प्रयोगात्सम्भव-
ति वस्तुसम्बन्धः असम्भवद्वस्तुसम्बन्धो यथा अयमात्मवीयस्थानि सर्गवक्रः स्थपात्यधिज्य-
स्मरचापलीलाम् जटापिनद्धोरगराजरत्नमरीचिलीढोभयकोटिरिन्दुः अत्र स्मरचापसम्बन्धि-
न्या लीलया वस्त्वन्तरभूतेनेन्दुना सम्बन्धानमसम्भवल्लीलासदृशीं लीलामवगमयतीत्यस्य वावे प्र-
कर्षात्प्रतिबिम्बकल्पनमुक्तम् एषापि पदार्थवाक्यार्थवृत्तिभेदाद्द्विविधा पदार्थवृत्तिस्समन-
न्तरमुदाहृता वाक्यार्थवृत्तिर्यथा त्वत्पादनखरत्नानां यदलक्तकमार्जनम् इदं श्रीखण्डलेपेन
पाण्डुरीकरणं विधोः केचित्तु दृष्टान्तालंकारोऽयमित्याहुः तदसत् निरपेक्षयोर्वाक्यार्थयोर्हि बि-
म्बप्रतिबिम्बभावेन दृष्टान्तः यत्र तु प्रकृते वाक्यार्थे वाक्यार्थान्तरमारोप्यते समानाधिकरण्येन
तत्र सम्बन्धानुपपत्तिमूला निदर्शनैव युक्ता न दृष्टान्तः एवं च यदलक्तकमार्जनमिदं वपुराश्रमवासे-
नोचितं जनस्य दूरीकृता खलु गुणैरुद्यानलता वनलताभिरित्यत्र दृष्टान्तबुद्धिर्न कार्या उक्तन्यायेन निद-
र्शनाया एव स्वयं सामानाधिकरण्येनैवासम्भवात्प्रतिपादिता उपमेयवृत्तेरुपमाने सम्भवादपि भवति।

उभयत्रापि सम्बन्धविवरणस्याविद्यमानत्वात् नच यथा वियोगे गौरनारीणां योगेऽप्युपमा।
तेऽङ्गमा अलक्ष्यत मलिम्लुरीमञ्जरीगर्भरेणुषु अश्वगण्डतलं प्रहृतं तदुमेसपातोऽद्रमः खर्जूरी
रेणुष्वसम्भवादौपम्यप्रतीतिः पदार्थवन्नायः। एवं वलन्यायेनापि भवति अण्डासिरेखोरफलं बो
ताङ्कारितेबोरश्चेत् प्राप्येऽर्थे धरिलन्यायेनापि भवति अत्रास्योरसिऽपरिबधरफलं बदरोपरिव
द्रंव स्थिरं धास्ते विगलद्धावासे अप्रयाणं ग्रामलिङ्गकेश्चाङ्कलिकं ते कवित्सुनानि बेयसाम
व्योदात्तिमाः आमेः सम्बन्धानुपपत्त्यापि भवति यथा उत्कम्पेनाये विंविदेवचलतिद्राक्षु
जेरत्नाभृतानुप्रत्नाम्भूतपरं भयान्नरुजघ्नयावत्तदेणोदृशानाम् पद्मां हंसगतिं खेवनप्राशितः
कान्तिः ऊर्वाभ्यां मायिताभ्यां सहसैव बन्धकारिणां गण्डस्थली विभ्रमाः अत्र सूत्रे तानि वेध
पदं तदन्यथानुपपत्त्यापादयोर्हंसगतितालिव्यते सा च तयोरनुपपन्नासादृश्यमुपगमयतीति
अत्रासम्भवत्सम्बन्धनिबन्धनानिदर्शना भेदप्राधान्येऽप्युपमानादुपमेयस्याधिक्ये विपर्यये।
वाव्यतिरेकः अधुना भेदप्राधान्येनालंकारकथनं भेदो वैलक्षण्यं सर्वोऽप्येवंभवति उपमा।
नादुपमेयस्याधिकगुणत्वे विपर्यये वाभावात् विपर्ययान्यूनगुणत्वम् क्रमेणोदाहरणम् दि

अ
स॰ स्व॰
२८
18

दृशश्च पक्ष्मलताविलासमद्यांसहस्तस्य मनोहरं तेवापीषु नीलोत्पलिनीविकासमस्यास्त्वं
दंतेन सहपदीनः तीर्णः तोणोपपापाणां भूयो भूयोविकथंतेतरांसत्यम् विरमसस्ती दसंदृरि
यौवनमातेवातयानेन अत्रविकस्वरनीलोत्पलिन्यपेक्षया हसितसहस्तस्य पक्ष्मलतायात्राधि
कगुणत्वं वेशापेक्षया यौवनस्य न्यूनगुणत्वम् शशिवैलक्षण्ये न तस्या पुनरागमात् उपमानो
पमेययोश्च सप्राधान्यानिदिशेषपरस्य सहार्थसम्बंधे सहोक्तिः भेदप्राधान्यपक्षे च गुणप्रधा
नभावानियमेन मत्रभेदप्राधान्ये सहार्थप्रयुक्तः गुणप्रधानभावः उपमानोपमेयत्वं वात्र वै
वक्षिकम् द्वयोरपि प्राकरणिकत्वादप्राकरणिकत्वाद्वा सहार्थसामर्थ्याद्धि तयोस्तुल्यकक्ष्य
त्वं न च तस्य तृतीयांतस्यानियमेन गुणभावादुपमानत्वमर्थाच्च परिशेषे च सप्रधानत्वादुपमेय
त्वं प्राह्यं त्वात्र गुणप्रधानभावः वस्तुतस्तु विपर्ययोपि स्यात् नत्वानियमेनातिप्रायोक्तिमूल
त्वमस्याः सा च कार्यकारणप्रतीतिनियमविपर्ययरूपा अभेदाध्यवसायरूपा च अभेदाध्यव
सायश्च श्लेषाभित्तिकोन्यथा वा सा सहोक्तिर्वाचकत्वादिना नानाभेदं नेयम् तत्र कार्यकारणप्रति
नियमविपर्ययरूपातिशयोक्तिमूला भवदपराधैः सार्धं संतापो वर्धते तरामस्याः तयमेति सावराकी

स्नेहेन सहकारदीयेन अत्रापराधानां संतापं प्रति हेतुत्वेऽपि तत्स्वल्पकालत्वेनोपनिबन्धः श्लेष.
भिन्नेकाव्यवसायद्रूपा यथा अस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि अस्तं
गमनेनाश्लेषं अस्तमितुमभयार्थं नान्न तदन्यथा द्रूपा यथा उत्कृष्टवचनैः सह सम्प्रति विघटते न च
क्रवाकमिथुनानि अत्र विघटनं सम्बन्धिभेदाद्भिन्नं न तु श्लिष्टम् एताद्देशोपसंहारेण स
होक्तिमात्रेनालंकारः अनेन साधं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु इत्यादौ स्वेवक
न्देसाहित्यमुदाहरणानि कर्मसाहित्ये यथा युजनोमरसनासार्धं यस्याजीतो नायकामयं चक्रे
वक्राभिधानेन प्रेक्षणाममनोरथः अत्र वयजननसमरस्योऽश्च वरोतिक्रियापेतयाकर्मत्वं पृष्ठा.
मालया . पिभवं नीटप्रणतो उत्तिष्ठिमं सहकौशीकस्वचलवैः सार्धं गुवैनोमितं भूपानां जन.
कस्य सं पायाधिया साकं समास्फालितम् वैदेह्या मननसा समं नन्दयुना कुष्टं ततो भार्गवप्रो
न्नहंहातिकेदलेन च समं तद्गगनमेघोऽधनुः सहोक्तिः प्रतिभटभूतं यदेवनोक्तिलतयाते विना
किंचिदन्यस्य सदसत्त्वाभावो विनोक्तिः सतस्य शोभनत्वस्याभावो शोभनत्वं एवमसत्त्वस्याशो
भनत्वस्याभावः शोभनत्वं नेह यत्र कस्यचित्सन्निधानान्निबन्धेनेसाद्दयाविनोक्तिः अत्र यो.

अ॰
लं॰ स्व॰
१९
19

भनत्वाशोभनत्वसत्तायामेव वक्तव्यायामसत्त्वमुखेनाभिधानमन्यानिवृत्तिप्रवृत्त्यर्थं तन्निवृत्ति
सिद्धिख्यापनार्थम् एवं च तदन्निहितौ विधिरेव प्रकाशितो भवति आद्या यथा विनयेन विना का
श्रीः का निशा शशिना विना रहिता सत्कवित्वेन कीदृशी वा सरस्वती अत्र विनयाद्यसन्निधि
प्रयुक्तश्रीविरहाद्यभिधानमुखेनाशोभनत्वमुक्तम् अत्र विनाशब्दप्रयोगेऽपि विनार्थो विव ।
ता यथा " कथं विनिमित्तो भवति यथा सहोक्तौ सहार्थं विवक्षा एवं च निरर्थकं तन्मगा तेन
लिन्या यथा न दृष्टेन्दुना हीनांशुबिम्बम् उत्पलिनी दोषापि निष्फलैव नयेन दृष्टा नलिनी विशदे ।
न्यादौ विनोक्तिरेवेन्दुहीनांशुदर्पणं विनानलिनीमन्मनोशोभनत्वप्रतीतेः एवं च परस्पराव
नोक्तिभंग्या चमत्कारातिशयपक्षेत्र यथोदाहृते विषये द्वितीया यथा मृगलोचनया विना ।
विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः अमनयुगते संदराशयोपं सुपदातेन विना नरेन्द्रसूनुः
अत्राशोभनत्वाभावः शोभनपदार्थसहोपभंग्या नः सैषा द्विधा विनोक्तिः अधुना विशेषणवि
च्छित्त्याश्रयेणालंकारद्वयमुच्यते तत्रादौ विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः ।
इह प्रस्तुताप्रस्तुतानां त्रिधा विदाव्यवस्था विक्रमावगमेति द्वैधम् वाच्यत्वेन सम्भवाने दैशाभंग्यपाश्रय

गपादाने नवेत्यपि द्वैतम् वाच्यत्वं एतत्तद्वे भेदमपि श्लेषालंकारस्य विषयः अप्रस्तुतनिबंधन
समासोक्तेर्विषयः तत्रानिमित्ते विशेषणसाम्ये विशेष्यस्यापि साम्ये श्लेषप्राप्तेः विशेषणसाम्या
द्धि प्रतीयमानमप्रस्तुतं प्रस्तुतावच्छेदकत्वेन प्रतीयते अवच्छेदकता च व्यवहारसमारोपः न तु
रूपसमारोपः रूपसमारोपे त्ववच्छादितत्वेन प्रकृतस्य न रूपरूपितत्वादेव रूपकम् तत्र च विशे
षणसाम्यं श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन भवत् त्रिधा भवति तत्र श्लिष्टतया यथा उपो
ढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् यथा समस्तं तिमिरांशुकं तया पु
रोपि रागाद् गलितं न लक्षितम् अत्र निशाशशिनोः श्लिष्टविशेषणमाहात्म्यान्नायकव्यवहार
प्रतीतिः अपरित्यक्तस्वरूपयोर्निशाशशिनोर्नायकताख्यधर्मविशिष्टयोः प्रतीतेः साधार
ण्येन यथा तन्वी मनोरमा बाला लोलाक्षी पुष्पहासिनी विकासमेति सुभग भवद्दर्शनमात्र
तः अत्र तन्वीत्यादिविशेषणसाम्याल्लोलाक्ष्या लताव्यवहारप्रतीतिः तत्र च लतैकगामिविका
साख्यधर्मसमारोपः कारणम् अन्यथा विशेषणमात्रेणानियतस्य लताव्यवहारस्याप्रतीतेः
विकासस्य च प्रकृत उपचारितत्वात् एवं च कार्यसमारोपोपि तेयम् एवं च समासोक्तिः पूर्वोपेत

अ॰
लं॰ स्व॰
२॰
20

याश्च स्फुटा उपमागर्भत्वेन यथा दंतप्रभापुष्पचिता पाणिपल्लवशोभिनी केशपाशालिवृंदे
न सुवेषा हरिणेक्षणा अत्र दंतप्रभापुष्पाणीवेति सुवेषा लतेवेत्युपमागर्भत्वेन हृते समासे
पश्चाद्दंतप्रभासदृशैः पुष्पैश्चितेति समासांतराश्रयेण समानविशेषणमाहात्म्याल्लतात्वव्य
हारप्रतीतिः अत्रैव परीता हरिणेक्षणेति पाठे उपमारूपकसाधकबाधकाभावात्संकराश्रये
णयोजने हृते पश्चात्सुवेषसमासांतरमाहिम्ना लताप्रतीतिरेषा रूपकगर्भत्वेन तु समासां
तराश्रयणात्समानविशेषणत्वं भवदपि न समासोक्तेः प्रयोजकमेकदेशविवर्ति रूपकं तु वे
नैवार्थान्तरप्रतीतेस्तस्याविषयत्वात् न चैवं दर्शितोपमासंकराविषयपक्षन्यायः उपमासंकर
योरेकदेशविवर्तिनोरभावात् उभयैकदेशविवर्ति रूपकमश्लेषेणाभवतीति द्वैविध्यम् अश्ले
षं यथा निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः धारानिपातैः सह किं नु
वांतश्चंद्रोऽयमित्यार्ततरं ररास अत्र निरीक्षणानुगुण्याद्विद्युन्नयनयोरिति रूपकं पयोदस्य द्र
ष्टृरूपत्वे रूपणमार्ततरं ररासेत्यत्र प्रतीयमानोत्प्रेक्षाया निमित्ततां भजते श्लिष्टं यथा मदन
गणनास्थाने लेख्यप्रपंचमुदंचयन्निवाविलसद्दलपत्रन्यस्तैर्द्विरेफमषीलवैः उ॰ रेलालांपि.

भिः कं कार्यस्य तेन नामापि सूचयन्त्याधिता विरहिण्याणेत्यायथायावधिकं मधुः अत्र हि पत्रलेखिका
यस्याश्चाहेतुश्लेषगर्भं रूपकं द्विरेफमधोलवैरित्येतद्रूपकानिमित्तम् अस्य च प्रचुरः प्रयोगविषय
इति समासोक्तिर्बहुनैकार्था तदेवं श्लिष्टविशेषणसमुत्थापितैकासाधारणविशेषणसमुत्थापि
तोकासाधारणविशेषणसमुत्थापितायमेकार्यसमारोपाभ्यां द्विभेदा औपम्यगर्भविशेषण
समुत्थापितोपमासंकरसमासाभ्यां द्विभेदा रूपकसमाश्रयेण तु भेदद्वयमस्यानविषयः तदे
वं पंचप्रकारा समासोक्तिः इयं च शुद्धकार्यसमारोपेन विशेषणसाम्येन उभयमयत्वेन प्रथमं द्वि
धा समासोक्तिः विशेषणसाम्यं पंचप्रकारं निर्णीतम् सर्वत्र चात्र व्यवहारसमारोपएव जीवित
म् स च लौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोपः शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहा
रसमारोपः लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः शास्त्रे वा लौकिकवस्तुव्यवहारसमारो
पइति चतुर्धा भवति तदेवं बहुप्रकारा समासोक्तिः शुद्धकार्यसमारोपेण यथा । विलिखति कुचा
वुच्चैर्गाढं करोति कचग्रहं लिखति ललिते वक्त्रे पत्रावलीमसमंजसाम् क्षितिप खदिरः श्रोणी
बिम्बाद्विकर्षति चांशुकं मरुभुवि हठात्तरुणीनां तवारिमृगीदृशाम् अत्र पत्रावलीविलेखना ।

ष्ठ
सं स्व
२१

दिशुद्धकार्यसमारोपात्खेदिरसपहवकामुकव्यवहारप्रतीतिः विशेषणसाम्येनोदाहृतम्। उभयमय
तेनयथा निलेतानलवकानिपादितमुबद्दपत्स्योधरः खेदिडतःकणेरुगतानितःकृतंवनयते।
नीलाब्जकांतितततम् यांतीनामसमम्रमाकुलपदन्यासमयोनीरसैः किं विंकणाकिभिः कृतंनत
हांभस्त्वहैरिवामनवाम् प्रतनीरसैःकणाद्विभिरितिविशेषणसाम्यं निलेनानलवकामीनादि
स्थकार्यसमारोपः व्यवहारसमारोपचन्तद्द्वये क्रमेणोदाहरणं यथा पुणमालिलिंगसुवमाणु।
दिशांवुचुम्बन्त्जामारोपापणेवलामालिवेलकराग्रैः अंतानिमगनवरवचाप्रारोतितनापात्किं विंव।
कारनहणोनयदीरुणायैः लौकिकंवस्तुरसादिभेदान्नानाभेदं स्वयमुत्प्रेत्यम्। यैरेकरूपम।
खिलास्वपिहृन्निबद्धांपप्रपाद्भिरक्षयमसंख्येतयाप्रवृत्तम्। लोपः कृतःखिलपरत्वजघोविभतो।
तैलेत्तणेनवक्तृतेऽ। एवमेवमन्ये शास्त्रागमप्रसिद्धवस्तुनि व्याकरणप्रसिद्धवस्तुसमारोपः
सीमान्तेनजगाम यत्नपनयोनोत्पतनयत्नसंगतेनस्पृहंवचसाकदाविदपियतरहोपमानेनयत्
प्रत्यांदापातितनयनवनपदत्यांविंविदेणीदृप्यांलावण्यपजयतिप्रमाणेराहितंवेतन्मत्कारहेत
प्रचलावण्यपलौकिकेमोमांसशास्त्रप्रसिद्धवस्तुसमारोपः एवंनकोपवेदज्योतिःशास्त्रप्रसिद्धव

२१

स्तुसमारोपो बोद्धव्यः स्वपतलीलालाडितैरूपोरुहेतोस्मरेदर्पं यतो विशेषणम् मानं निराकर्तुं
मण्डेवक्षितोपिवस्वपालिङ्गितमवरोहमासीत् अत्रतर्के प्राप्तप्रसिद्धवस्तुसमारोपः पाण्डित्यप्र
वृः प्रकृतेलक्षणया व्याख्येयः तथा मंदमानिमधुरपेमोपलालादाश्लीतम्सूपपशुवाभवतमः इह।
यत्तामृरजंसिवावरेदोषमोवार्यपतेरसन्निधौ अत्राप्रवेदप्राप्तप्रसिद्धवस्तुसमारोपः गाढं
तेमरुदंतिनोग्रहरतः स्मामंडलेवैधृतेरतामावरतः सदावेदयतोलारेषयाजोत्सवम् इ
वोसंत्यजतःस्थितिंशुभकरीमासेव्यमानस्तनेवधंतेविजयाश्रयः किमिवनश्रेयाश्विनोमंग।
लम् अत्रज्योतिःशास्त्रप्रसिद्धवस्तुसमारोपः असमंजातपर्यंरापिसदनुमानैकरसिकैरापिते।
योयोनोपारेरश्मिनगातिलंपरिजहतु अत्रएवंव्यापारोगुरुवरबुधैरित्यवासितोनव्याख्यानोल
दाहृतेऽविषये स्मरसूददर्भांकुरेत्यादौ तत्रैकं काव्यलिंगम् यत्र तु वाक्यार्थो हेतुस्तत्र हेतुत्वप्रतिपा
दकमन्तरेण हेतुत्वायोपन्यासे काव्यलिंगमेवातत्स्वनोपन्यस्त तु हेतुत्वेऽर्थान्तरन्यासः एवं
चास्यार्थद्वैविध्याया कारणवाक्यार्थयोः हेतुत्वे काव्यलिंगमेव पर्यवस्यति समर्थ्यवाक्यार्थस्य तापे
क्षितानार्थस्याभावात् नत च सामान्यविशेषभावप्रवार्थान्तरन्यासस्य विषयः यत्त्वर्थान्तर
न्यासस्य कार्यकारणगतेन समर्थकत्वमुक्तं तदुपलक्षणं काव्यलिंगमनाश्रित्य तदविषयत्वेन

लक्षणान्तरस्योद्भटैराश्रितत्वात् तल्लक्षणाञ्च यथायेणान्वयत्वे च समानत्वं नीतीति विवक्षाविषयः का
र्यलिंगस्यार्थान्तरन्यासाद्दर्शितः इति कार्यकारणयोः समर्थकत्वमर्थान्तरन्यासे पूर्वं दर्शितमिती
यतीगमनिका आश्रयितव्या एवं तर्कन्यायमूलमलंकारद्वयमिह प्रतिपादितम् अधुना वाक्य
न्यायमूला अलंकारा उच्यन्ते तत्रोद्दिष्टानामर्थानां क्रमेणानुनिर्देशो यथासंख्यम् ऊर्ध्वनिर्दि
ष्टाः उद्दिष्टाः पश्चान्निर्दिष्टा अनुनिर्दिष्टाः सर्वार्थादर्थान्तरगतः सम्बन्धश्चात्र सामर्थ्यात्प्रतीयते
ऊर्ध्वनिर्दिष्टानामर्थानां पश्चान्निर्दिष्टैरर्थैः क्रमेण सम्बन्धो यथासंख्यमिति वाक्यार्थः अन्ये त्विम
मलंकारं क्रमसंज्ञयाभिदधिरे तच्च यथासंख्यं शाब्दमार्थं चेति द्विधा शाब्दं यत्रासमस्तानां पदा
नां समस्तैः पदैरर्थद्वारकः सम्बन्धः तत्र क्रमसम्बन्धस्यातिरोहितस्य प्रतीयमानत्वात् आर्थं तु य
त्र समासः क्रियते तत्र समुदायस्य समुदायेन सह सम्बन्धस्य शाब्दत्वात् अर्थावगमनपर्यालो
चनेन तु अवयवगतः क्रमसम्बन्धः प्रतीयते तेनात्र यथासंख्यस्यार्थत्वम् आद्यस्योदाहरण
म् लावण्यौकसि सत्प्रतापगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेध
सा इंदुः किं घटितः किमेष विहितः पूषा किमुत्पादितं चिंतारत्नमहो मुधैव किममी सृष्टाः कु

अ॰
स॰ स्व॰
५२

लक्ष्माभृतः अत्र लावण्यौकः प्रभृतीनां इन्द्वादिभिः क्रमसम्बन्धस्याव्यवहितत्वेन प्रतीतेः शाब्दं
यथासंख्यम्। द्वितीयं यथा कज्जलहिमकनकरुचः स्वपर्णवृषहंसवाहनाः पान्तु वः जलनिधि-
गिरिकमलस्था हरिहरचतुराननादन्तु अत्र कज्जलादेः स्वपर्णादिभिः संबन्धो जलनिध्या-
दिभिः सह सम्बन्धे हर्यादिः प्रभृतिभिः सम्बन्धः कृत्या समुदायनिष्ठः प्रतीयते अर्थानुगमानुसा-
रेण त्ववयवानां क्रमसम्बन्धावगतेरित्यार्थं यथासंख्यम्। एवमनेकस्मिन्नेकमेकस्मिं-
श्चाक्रमेण पर्यायः क्रमप्रस्तावादिदमुच्यते एकमाधेयमनेकस्मिन्नाधारे यदि भवति स एकः प-
र्यायः न त्वेकमनेकगोचरमिति प्राक्तनेन लक्षणेन विशेषालंकारोऽत्रोक्तः नात्र मध्ये भिद्यु-
च्यते इत्याशङ्क्योक्तं क्रमेणेति इह च क्रमप्रतिपादनादाधाराणां तत्र यौगपद्याधारे अनेकस्याधेयस्य।
स्य द्वितीयः पर्यायः न त्वत्र समुच्चयालंकारो वक्तव्यते इत्येतदर्थं क्रमेणेति योज्यम्। अत एव गु-
णक्रियायौगपद्यं समुच्चय इति समुच्चयलक्षणे यौगपद्यग्रहणम्। अत एव क्रमाश्रयणात्प-
र्याय इत्यन्वर्थमभिधानम्। विनिमयाभावात्परिवृत्तिवैलक्षण्यम्। तस्या हि विनिमयो लक्षणं।
त्वेन वक्ष्यते तत्र अनेकः असंहतरूपः संहतरूपश्चेति द्विविधः तत्र द्वैविध्यमाधाराधेयगतमि

तिवर्णारोस्यभेदाः क्रमेणयथा नन्वाश्रयास्थितिरियंनवकालकृत्यकेनोन्तरोन्तरविशिष्टपदेप
हिछाप्रागणेस्वात्यदयेष्ठघलत्मणोपकणेधनावससेवावेपुनःखलानाम् विरहछुरागादय
रानैवर्तितः स्तनागरागारुणेनाष्ठवकंडकात् ऊर्ध्वाऊराटारपरिलतनांगुलिः हतोलस्तूत्रप्रणे।
यीतपाकरः निपणस्वभास्वाद्वलनूप्रागणांपस्संचरोभूदभिसारिकानाम् नदंमुखोल्काविवि
नात्मिघाभि स्ववात्तेनेराजपथ्यः शोवाभिः यथैवमनुगम्यतेतिहृष्णादरोतिशियेतिकोन्तेतिसहोत्स
वोभूत् नत्रैवदेवाद्वचनेमदीयेपत्नीतिभार्येतिगिरस्त्ववंति प्रवृत्कालकृत्यमनेकमनेकास्मिन्।
संहते आश्रयेक्रमेणास्थितिसन्निबद्धम् करस्थकोनेकास्मिंसंहतेक्रमवान् प्रयत्केडकयोन्नि।
हृन्मपादानतयासंहिततवेनस्थेनतावात् अभिसारिकाःशोवाष्ठानेकस्वभावाश्रसंहतरूपाप।
कास्मिन्नाश्रयेराजपथेथमवर्तिन्यः वचनेवैकास्मिन्नाश्रयेनुगम्यतेगादिवर्गः पत्नीत्यादिवर्गश्च
वर्गोत्वादेवसंहतरूपोनेकक्रमवान् उपनिबन्धः सममन्यूनाधिकानांसमाधिकन्यूनैःविनिम
यः परिहर्त्तिः विनिमयोऽत्रवकविद्यमानाकस्यविवादानम् समेननतल्पागुणेनत्यज्यमानेनतना।
हृष्टास्येवादानात् तथा अधिकेनोत्कृष्टगुणेनहीयमानेनन्यूनगुणस्यहीनगुणस्यपरिग्रहः

अ॰
स॰ स्व॰
५३
53

एवं न्यूनेन हीनगुणेन त्यज्यमानेनाधिकगुणस्योत्कृष्टगुणस्य स्वीकारात्तद्देशाद्विप्रकारापरिहृ।
तिः। क्रमप्राप्तिभासंभावात्पर्यायानन्तरमस्यालक्षणम् समपरिहृतिर्यथा ऽसोऽहत्वामसारीणां।
येनगुड्डेघगहत्यनताहिरणपालवधायेऽभ्ययशः माकं जयश्रिया किंमेत्वयामयाभरणानि यौवने
धृतेन त्वयाबाधेकयोगेभिवल्कलम् वदयदोघेस्तु एवं इतरके विभावरीयपरुणायकलाने अत्रो
त्कृष्टाभरणेनाभरणेन न्यूनेन गुणस्य वल्कलस्य परिहृतिः न्यूनपरिहृतिर्यथा तस्याहि प्रवयसो जरद्ग
वः स्वर्गिणः किमिव पोष्यते भूयैः येन नजेरवलेवखण्ड्यात्क्रीतमिं द्विकिरणोज्वलं यशः अत्र व
लेवरेण न्यूनगुणेन यशसः उत्कृष्टगुणस्याविनिमयः दृगादर्शनमेते सत्त्वाणावरतन्नुत्वया
क्रीताः किंत्वपहरसि मनोयदस्मात्सिरणणकमेतदसत् अत्राद्येयेसमपरिहृतिः द्वितीयेथे
न्यूनपरिहृतिः एकस्यानेकत्र प्राप्तावेव नियमनेन परिसंख्या एकानेकप्राप्तावाहि हवचन स्य ए
वं वस्तु यदानेकत्र युगपत्संभाव्यते तदा तस्य संभाव्ये एकत्राद्वितीयपरिहारेण नियमनं परिसं
ख्यापरिवर्जनेनैकस्य विहजंनेनात्रावि तसंख्यानां वर्णनीयत्वेन गानोनं परिसंख्या सा वैघा प्र
श्नपूर्विका नदन्यथा चेति प्रथमं हि द्विधा प्रत्येकं ववजेनीयस्य प्राप्तत्वात्वाभ्यां है विध्यमितिव

ऽभ्युपेता क्रमेण यथा किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः किं च
क्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकम् किमासेव्यं पुंसां सविधमन
वद्यं द्युसरितः किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः किमाराध्यं पुण्यं किमभिलषणीयं च
करुणा यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामा
स्त्रे चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् कौटिल्यं कचनिचये करचरणाधरदलेषु
रागस्ते काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति अत्र चालौकिकं वस्तु गम्यमानं वस्त्वन्तर
व्यवच्छेदपर्यवस्यतीति व्यवच्छेद्यं वस्तु तु न ग्राह्यं साध्यं चेति नियमाभावः अलौकिकाभिप्राये
ण च वक्त्रवित्रस्त्रपूर्वकं ग्रहणम् विलङ्घयन्ति श्रुतिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि
विभाति यस्यामपि वक्रिमाणमेको महाकालनरार्धचन्द्रः तथा चित्रकर्मसुवर्णसंकरोऽयमिति द्व
न्द्वग्रहणानीत्यादौ श्लेषसमुच्चयमस्यावाहुत्वानिबन्धनम् अत्र चानियमपरिसंख्ययोर्वाक्य
चित्रत्वसिद्धलक्षणं नादरणीयमिति व्यापनायानियमनपरिसंख्येति समानाधिकरणोपात्तिः
अत एव पादैकस्यापि प्राग्भिरत्र स्वीक्रियते इति युगपत्संभावनं प्रायिकम् स्यादिप्रश्निकयार्णा

अ॰
स॰ स्व
४४
५५

र्थादापतनमर्थापत्तिः दण्डापूपयोर्भावः दण्डापूपिका द्वंद्वमनोज्ञादिभ्यश्चेति वुञ् एषो दण्डादि
नान्तद्भावः यथा अहमहमिकेत्यादौ अन्ये तु दण्डापूपौ विद्येते यस्यां नीतौ सा दण्डापूपिका
नीतिः एवमहंशालो अहोपान्तोऽस्यामित्यहमहमिकेति समत्वर्थीयष्ठन्नित्याहुः अपरे तु दण्डापूपा
विव दण्डापूपिकेति इवे प्रतिकृताविवकमनं वर्णयन्ति अत्र हि मूषककर्तृकेण दण्डभक्षणेन
तत्सहभावापूपभक्षणमर्थात्सिद्धम् एवं न्याये दण्डापूपिकाशब्देनोच्यते ननु यथा दण्डभ
क्षणादपूपभक्षणमर्थायातं न तद्वत्साविदं यस्यां नीतौ सा मन्तवेदमवमानं समानन्याय
स्य सम्बन्धरूपत्वाभावात् असम्बन्धे चानुमानानुपपन्नात् अर्थापत्तिश्च वाक्याविशेषान्याय इ
ति तज्जातीयेनेहाभिधानम् इयं च द्विविधा प्राकरणिकादप्राकरणिकस्यार्थादापतनमेकः प्र
कारः अप्राकरणिकात्प्राकरणिकस्यार्थापतनं द्वितीयः आद्यो यथा पक्षपातेरपि तान्यहाति
हक्काटययदाईस्तुनाससमासमोकः कमपरमवशो नाविश्रकुपुर्वविभ्रमापिते यदसौ स्पर्शोन्तिभा
वाः अत्र अभ्युद्गतोऽन्तःप्राकरणिकः इतरजनद्वृत्तान्तमप्राकरणिकमर्थमाक्षिपति द्वितीयो यथा
धूतधनो विबाकुपालालिनि प्रौलान सन्तियनदा स्वयेमद् रं गुसं जकेनु गणनाकैववनाकेषकाके

पु अत्र शैलदृष्टान्तो व्याकरणे कोदिपुदृष्टान्तो व्याकरणिकमर्थादाकृष्यति आविच्छायसाम्यान्नेमि
त्तमेष्वेव नादिंरूपते अलंकारः प्रांशुकारननस्कपालो परिजनो विपूर्णेणोगो भृंगीवस्त्रवद्रूपको
गतत्वयाः अत्र स्वयंरूपाणो रूपिभवति सर्वामरगुरोः विधौ वक्रे मूर्ध्नि भास्वति त्वयि तत्त्वं के पुनरसौ अत्र
विधौ वक्रे इति श्लिष्टम् अप्राकरणिकाद्यस्यापि दृष्टान्ता व्याकरणिकाक्षेपनं तुल्यबलविरो
धो विकल्पः विरुद्धयोस्तुल्यप्रमाणाश्लिष्टत्वात् तुल्यबलयोरेकत्र युगपत्प्राप्तौ विरुद्धत्वादेकयो
गपद्यासम्भवे विकल्पः औपम्यगर्भत्वाच्चात्र चारुत्वं यथा नमन्तु शिरांसि धनूंषि वा कर्णपूरीक्रि
यन्तामाज्ञा मौर्व्यो वा इत्यादि अत्र प्रतिराजकार्ये नमने शिरसां धनुषां च तुल्यप्रमाणाश्लिष्टत्वं
सन्धिविग्रहौ वा त्वक्रमेण तुल्यप्रमाणे प्रतिराजविषयौ विहितेन स्पर्धयात्द्वयोरपि सम्भाव्यमा
नत्वात् दोषे सौ विरुद्धाविति नात्मनयोर्युगपत्समुच्चितिः प्राप्यतस्त्वात्र युगपत् प्रकारान्तरस्या
नाशंक्यत्वात् ननु स्वतन्त्रायप्रामो विकल्पः नमनहत्त्वं तयोः साटप्यामित्यलंकारनापवेक
णपूरीक्रियन्तामित्यादौ योजनीयम् औपम्यगर्भत्वाच्चत्र च वित्तशोभाविद्धम्भनाप्यर्थं रूपते य
था भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी ध्यानालम्बनतां समाधिनिरतैर्नीते हि

अ॰ स॰ स्व॰ ४५ 45

तथाह्यत्र लावण्यस्य महत्त्वे धीरसिकतां लक्ष्मीं दृष्ट्वा स्तननतो युष्माकं ऊरुतां भवान्निशामनेनेवेत
नवाहरेः अत्रनेत्रे तत्ववैतिविकल्पः उत्तमतासृत्तुल्यप्रमाणाश्लिष्टत्वम् नवात्रसमुच्चयेवाशङ्कः
सम्भवत्यामापिगतोमहाकाविस्मवतारेतथाप्रयोगाभावात् ननुविरोधनिमित्तकोविकल्पः कथं
वात्राविरोधः नैतत् तत्रमध्येनेत्रयोः प्राविष्टत्वान्नयोः दृष्टयाभिधानमेवनकार्यंहृतेयसत्त्वावि
भावंगमयति स्पर्धिभावात्त्वविरुद्धत्वम् नेत्रेअथवा समस्तमेव पाषेरामित्यर्थावगमो विकल्पवशस्य
तुप्रत्ययत्वात् सवाचुश्लेषाश्लिष्टः लिंगश्लेषस्यवचनश्लेषस्यवात्रदृष्टः तस्मात्समुच्चयप्रतिप
क्षभूतो विकल्पाख्योलंकारः पूर्वैरकृतविवेकोत्रदर्शितः इत्यवधातव्यम् गुणक्रियायौगपद्यं समु
च्चयः गुणानां वैमल्यादीनां यौगपद्येनावस्थानं तथैव च क्रियाणां समुच्चयालंकारः विकल्पप्रा
तिपक्षेण चास्य स्थितिः क्रमेणोदाहरणम् विदलितसकलारिकुलं तव बलमिदमभूद्विमलं च
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि अयमेकपदे तया वियोगः प्रियया चोपनतः
सुदुःसहोस्य नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः एतद्विभिन्नविषयत्वेनोदाहर
णद्वयम् एकाधिकरणत्वेनाप्ययमलंकारो दृश्यते यथा बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधा

नेनत्वं शालम्बयद्दिदृष्टान्ते साविधुरितासाधोनयाकर्णयताम्। प्रोतेनास्यति शुष्यति प्रलपति प्रस्ता
यति प्रेंखति स्खलति घटते प्रणिपतति दलति स्तुन्मूर्च्छति तुष्यति। एवं गुणसमुच्चयेऽप्युदाहार्यम्। केचित्तु
ननु केवलं गुणक्रिययोर्भ्योऽभ्यस्तत्वेन समुच्चयो यावत्समस्तत्वेनापि भवतीति वर्णयन्तमुदाहरं
तिव स्वंवाह्ने विनत स्तनमुखे हासेन वन्द्याऽह्नुनसाकेकरव्याहृते प्रसरत्प्रसादे मुद्भ्रूने सप्रेमकस्मि
स्थिरम्। ननु भ्रूकान्तमपांगदृग्गिर्विकचे सज्जन्तुरंगोत्तरं वल्गुः सास्फुरचवनं तेरसवप्रादेकैकम
न्यात्क्रियम्। अत्र शाकेकरादयो गुणशाब्दान्यंवादेन्यादयः क्रियाशब्दा इति सामस्त्येह गुणक्रिय
योगपद्यम्। प्रसादेम प्रेमेत्यादीनां समासकृत्तद्धितेषु सम्बन्धाभिधानमिति सम्बन्धस्यैवा।
ख्यातत्वात् सम्बसिद्धयमेरूपत्वेन गुणत्वात् गुणशब्देन गुणयौगपद्यं द्रष्टव्यम्। एवमयं त्रिविधः
समुच्चयः। एवं समुच्चयं प्रकारत्रयभिन्नं लक्षयित्वा द्वितीयं लक्षयति। एकस्यासिद्धिहेतुत्वेन्य
स्यतत्करत्वं समुच्चय इत्येव यद्येकः कस्यापि कार्यस्यासिद्धिहेतुत्वेन प्रक्रान्तस्तत्रान्योऽपि यदि
स्यात् तदा तत्सिद्धिं करोतीति न द्वायमपरः समुच्चयः। न चायं समाध्यलंकारेण न भवति यत्रैव
स्य कार्यं प्रति पूर्णं साधकत्वमन्यस्तु तेन काकतालीयन्यायेनापततीति तत्र समाधिवस्य

अ॰ स॰ सू॰ ८९ ५८

ते यत्र तु खलेकपोतिकान्यायेन बहूनामवतरणं तत्र समुच्चयः अत एवानयोः सुमहान्भेदः स
च समुच्चयः सद्योगे सद्योगे सदसद्योगे च भवति इति त्रिधाभिधीयते सतः शोभनस्य सतामस
मुच्चीयमानेन योगे यथा कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी भुजबलमलं स्फीता ल
क्ष्मीः प्रभुत्वमखण्डितम् प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं राजन्स्त्व
व तवांकुशः अत्र मालिन्येन शोभनस्य कुलस्य मूर्त्यादिभिः शोभनैः समुच्चयः एवैकं वर्ण्यं हे
तुतायोग्यं तस्यार्थ्यानि बहूम् असतोऽशोभनस्य असतामसमुच्चीयमानेन योगे यथा दुर्वा
राः स्मरमार्गणाः प्रियतमो दूरे मनोत्युत्सुकं गाढं प्रेम नवं वयोतिकठिनाः प्राणाः कुलं निर्म
लम् स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोक्षमी नो सख्यश्चतुराः कथं नु विरहः सो
ढव्य इत्थं मया अत्र स्मरमार्गणानां दुर्वारत्वेनाशोभनानां नानादृष्टैरेव प्रियतमदूरत्वादिभिः
समुच्चयः नववयः प्रभृतीनां यद्यपि स्वतः शोभनत्वं तथापि विरहविषयत्वेनात्राशोभ
नत्वं ज्ञेयम् सदसतः शोभनाशोभनस्य तादृशेन सदसता समुच्चीयमानेन योगे यथा श
शी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः प्रभुर्धन

परायणः सततं दुर्गतः सजनो नृपांगनगतः खलो मनसि समप्राप्तानिमं अत्र शाशीनः स्वतः ।
शोभनस्यापि दिवसधूसरत्वाद् अशोभनत्वेन सदसतस्तादृशो देवकामिनीप्रभृतिभिः समुद्ध
यः न तत्र कार्ष्ण्यं सम्प्रदीयमानः शोभनोन्यस्त्वशोभन इति सदसद्योगो व्याख्येयः अत्र नृपांग
नगतः खलु इत्यशोभनः अन्ये तु शोभनाः इति कथं सम्प्रदीयमानस्य सततस्तादृशो नाम ततः यो
गः नैतत् नृपांगनगतः खलु इति प्रस्तुतन प्रक्रमभंगात् दुष्टमेव न तु सौंदर्यनिमित्तं नामित्युप
त्यमेवैतत् अत एवान्यैरेवमादौ सहचरभिन्नार्थो दुष्टत्वेनोक्तम् प्रकृते तु नृपांगनगतत्वे
न शोभनत्वं खलत्वेनाशोभनत्वमिति समर्थनीयम् एवमपि विशेष्यस्य शोभनत्वं प्रक्रान्तं वि
शेषणस्याशोभनत्वमेव हतवृत्ततेन सर्वथा निरवद्यमेतत् ननु द्वौ रागः स्मरमार्गणा इत्या
दावुक्तोदाहरणे वाक्यार्थं न सदसद्योगः नैतत् इह शोभनस्य सतो शोभनत्वमिति विवक्षा न त्व
शोभनमेवैतदिति विवाहितमित्यस्ति भेदो नयोः अत्र एवैकत्रोपसंहृतं मनसि समर्पितत्वा
नोतिसंदर्भेनांतः प्रविष्टानामपि व्याख्याहेतुत्वात् अपरत्र तु कथं सोऽयमिति सर्वथा दुष्ट
त्वाभिप्रायेण न स्यादाक्षिप्रकारत्रयस्यापि विवक्षितविषयत्वम् कारणांतरयोगात्कार्यं स्तु करत्वं स

अ॰
स॰ स्व॰
८१

47

माधिः येन विदाबद्धस्य कार्यस्य कारणान्तरसम्बन्धात्सौकर्यं यत्समस्य साधनात्समाधिः।
समुच्चयसादृश्यात्तदनन्तरमुपक्षेपः तत्रैकलक्षणेन तु प्राक्प्रतिपादितमेव तदमानमस्यानि
राकरणे पादयोर्मे पतिष्यतः उपकाराय दिष्ट्या दत्तदीर्णं वनगर्जितम् अत्र मानानिराकरणे का
र्ये पादपतनं हेतुः ततः सौकार्याय च तगर्जितस्य कारणान्तरस्य प्रक्षेपः सौकर्यं चोपकारायेति।
अनेन प्रकारेणेतरम् एवं वाक्यन्यायाश्रयेणालङ्कारान्प्रतिपाद्याधुना लोकन्यायाश्रयेणालं
कारा उच्यन्ते तत्र प्रतिपक्षप्रतीकारणानौचितीयांतिरस्कारः प्रत्यनीकम् यत्र बलवतः प्रतिप
क्षस्य दुर्बलेन प्रतिपक्षेण प्रतीकारः कर्तुं न शक्यते इति तत्सम्बन्धिनो दुर्बलस्य यत्तु बाधितं तति
रस्कारः क्रियते तत्प्रतिनीकम् अनीकस्य सैन्यस्य प्रतिनिधिः प्रतिनीकमुच्यते तत्तुल्यत्वादिद
मपि प्रत्यनीकम् उच्यते यथा अनीकेऽभियोक्तव्ये तत्रासमर्थो न प्रतिनिधिभूतमन्यद्धामोहे
नाभियुज्यते तद्वदिह प्रतिपक्षाविजये दुर्बलतदीयोतिरस्करणमित्यर्थः प्रतिपक्षगतत्वेन
बलवत्ताख्यापनं प्रयोजनम् यथा यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते अत्र राहोर्भगवांल्लक्ष्मो बलवान्प्रतिप

तः तृतीयवज्रसारदृष्टमुखेन पुनर्ईर्बलस्तंभ इमाः तन्निरस्काराद्भगवतः प्रकाशं वगतिः उ
पमानस्याक्षेप उपमेयताकल्पनं वा प्रतीपम् उपमेयस्यैवोपमानभावोद्वहनसामर्थ्याद्यदु
पमानस्य कैमर्थ्येनाक्षेपः आलोचनं क्रियते तदेकं प्रतीपम् उपमानप्रतिकूलत्वादुपमेय।
स्य प्रतीपमिति व्यपदेशः यदप्युपमानतया प्रसिद्धस्योपमानान्तरमतीति छायापायिवयाद्य
नादराद्धं उपमेयत्वं कल्प्यते तदप्युक्तगत्या द्वितीयं प्रतीपम् क्रमेणोदाहरणम् यत्र च प्रसृत
नां च दूरेव सहजं गुण्डमालानुगतं भारः स्तु कुवलयदलदामा नोत्पादि यथा वा लावण्यौ
कस्सिस प्रतापगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा इन्दुः
किं घटितः किमेष विहितः पूषा किमुत्पादितश्चिन्तारत्नमहो मुधैव किमिमे सृष्टाः
कुलक्ष्माभृतः अत्र यथासंख्यमप्यस्तीति प्राक् प्रतिपादितम् यदाहि ताव तुण्हरिकण्णुदा
ण्णेण तुण्णं तव प्राणिज न सह सहण किमो ग्रदि चंदाने वासि जइ जणएण अत्रोपमानत्वेन प्र
सिद्धस्य चंद्रमसो निष्कवर्णमुपमेयत्वं कल्पितं वदनस्य चात्रोपमानत्वविवक्षा प्रयोजिका
काविवक्षणानिष्पन्नमेवौपम्यमनादरकारणम् यथा गर्वसमेव ... मिमं लोचनयुगलेन किं

अ॰
स॰ स्व॰
५८

वहासेमुग्धे संतीहृष्टानिदिशोदिशोस्मरःस्तुवैनीलनालिनानि अत्रोत्फुल्लभाजमानउप॰
मानप्रादुर्भावप्रबन्धकारस्कारणम् अनेनन्यायेनात्रकल्पहृगुणत्वादुपमानाभावमपि
नसहते तस्यैवोपमानभावकल्पनेपिप्रतीपमेव यथा अहमेवगुरुःसुदारुणानामितिहा
लाहलतातमास्मदर्पः नन्वसंतिभावादृष्टानिभूयोभुवनेस्मिंवचनानिडमेनानाम् अत्र
हालाहलेप्रकृष्टहृद्दोषत्वात्संभाव्योपमानभावमपिउपमानत्वेनानिबद्धम् भाव्यमानोप
मेयभाववस्तुनावस्त्वंतरानिगूहनंमीलितम् सहजेनागंतुकेनवालक्षणायत्स्वंतरेण
वस्त्वंतरानिगूह्यते तदनुवर्णाभिधानंमीलितम् नवायसामान्यालंकारःतस्य
हिसाधारणयोगाद्भेदानुपलक्षणंरूपम् असत्त्वहृद्गुणेनानिकृष्टगुणस्यातिरोधानामि
तिमहान्यनयोर्विशेषः सहजेनयथा अपांगतरलेदृशौमधुरवक्रवर्णागिरोविलास
भरमन्थरागतिरतीवकान्तंमुखम् इतिस्फुरितमंगकेहरिणशावदृशःस्वतोलीलयातदत्रनम
दोदयःकतमपदोपिसंलक्ष्यते अत्रवसंतावस्थालिंगनाभावाविवेकेनलक्षणामदोदयकृत
स्त्वकारल्पादिनिरोदीयते आगंतुकेनयथा येकंदरासुनिवसंतिसदाहिमाद्रेस्त्वत्पात॰

शंकितानयियोविवशाद्विषस्तेष्वंगमस्तुल्यकसुवद्वहतांसककम्पातेघासहोवतभियांनबयो
ऽभिनः अत्र हिमाद्रिकंदरानिवाससामर्थ्यप्रतिपन्नेन शैत्येन सम्बद्धाविनावागंतुको
कम्पयोर्मांवोभयहेतुयोस्तयोस्तिरोधायकोऽतिरोधायकत्वादेववसोऽलितत्वापदेशः प्र
स्तुतस्यान्येन गुणसाम्यादैकात्म्यं सामान्यम् यत्र प्रस्तुतस्य वस्तुनः अप्रस्तुतेन साधारण
गुणयोगादैकात्म्यं भेदानवसायादेकरूपता निबध्यते तत्समानगुणयोगात्सामान्यम्
नवयमपह्नुतेः किं विशेषात्प्रथक्सा विदप्रतिज्ञापनात् उदाहरणम् मलयजरसावि।
लिप्ततनवो नवहारलताविभूषिताः सिततरदंतपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः प्रियतमवसतिं प्रयांति सु
खमेवा निरस्तभियोऽभिसारिकाः अत्र मलयजरसविलेपनादीनां चंद्रप्रभया सहाविभा
वितां गता इति भेदाप्रतीतेः दर्शिता स्वगुणत्यागादत्युत्कृष्टगुणस्वीकारस्तद्गुणः यत्र परिमित
गुणस्य वस्तुनोऽसमीपवर्ति प्रकृष्टवस्तुगुणस्वीकरणं कृत्वे स ततद्गुणः तसोत्कृष्टगु।
णस्य गुणाश्रयस्याधिप्रतिकृत्यान वेदं मीलितम् तत्र हि प्रकृतं वस्तु वस्त्वंतरेणाच्छादितमवेन

ग्र॰
स॰ स्व॰
५९
५१

प्रतीयते इहत्वननुपकृतस्वरूपमेव प्रकृतं वस्त्वेव स्वं न रगुणोपरक्तं तया प्रतीयते इत्यस्मात
योभेदः उदा विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्याः रत्नैः पुनर्यत्र रुचा रुचं
स्वासामनिन्ये रवे प्राकारो रविनीलैः अत्र रविरथ्याश्वानामरुणवर्णस्वीकारः तस्यापि गारुत्मतम-
णिप्रभास्वीकार इति तद्गुणत्वम्। सति हेतौ न तद्रूपाननुहारो ऽतद्गुणः तद्गुणप्रस्तावात्तद्वि-
पर्ययरूप अतद्गुण उच्यते इह न्यूनगुणस्योत्कृष्टगुणपदार्थधर्मस्वीकारः अत्र सत्यान्याय्यः
यत्र पुनरुत्कृष्टगुणसन्निधानाख्ये हेतौ सत्यपि तद्रूपस्योत्कृष्टगुणस्याननुहरणं न्यूनगुणेना-
नुवर्तनं भवति सः अतद्गुणः तस्योत्कृष्टगुणस्यास्मिं गुणानमं नीतीति कृत्वा यदि वा तस्याप्रकृ-
तस्य रूपाननुहारस्याननुहरणहेतावतद्गुणः तस्याप्रकृतस्य गुणाग्रासेऽस्मिन्नमं नीतीति क्रमे-
णोदाहरणम्। धवलोसि जइवि सुंदर तहिवि तप मज्झ रंजिअं हिअं। अअराअभरिए विहिअए सुहअ
सुहअ णिहित्तोरणरत्तोसि। गांगमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः। राजहंस तव
सैव शुभ्रता चीयते न च न चापचीयते। पूर्वत्रातिरक्तहृदयसम्पर्कान्नायकस्य धवलस्याप्युक्त्वा
स्याप्राप्तमपि रक्तत्वं नानिष्टत्वानिमित्ततद्गुणः उत्तरत्राप्रकृतस्य गांगयामुनजलसम्पर्केऽपि।

५९

न तथारूपत्वमिति स्वयमप्यनन्तगुण एव कार्यकारणभावस्य वाच्याविवक्षणान्न विषमालंकारव-
काशः । उत्तरात्प्रश्नोन्नयनमसकृदसंभाव्यमुत्तरं चोत्तरं । यत्रानुपनिबध्यमानोऽपि प्रश्न उपनि-
बद्धादुत्तरादुन्नीयते तदेकमुत्तरम् । न चेदमनुमानं पक्षधर्मतादेरनुद्देशात् । यत्र च प्रश्नपूर्वक-
मसंभाव्यमानमुत्तरं न सकृत् तावन्मात्रेण चारुत्वाप्रतीतेः अपि त्वसकृदुपनिबद्धं तद्द्विती-
यमुत्तरम् । न चेयं परिसंख्या व्यवच्छेद्यव्यवच्छेदकपरत्वाभावात् । क्रमेणोदा० एकाकिनी यदब-
ला तरुणी तथाहमस्मद्गृहे गृहपतिश्च गतो विदेशम् । कं याचसे तदिह वासमियं वराकी श्वश्रू-
र्ममान्धबधिरा ननु मूढ पान्थ ॥ का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही । किं सोक्खं सुक-
लत्तं किं दुक्खं जं खलो लोओ ॥ एवं च समानेऽपि वासो दीयतामिति प्रश्न उत्तरादुन्नीयते उत्तरत्र च दै-
वगत्याहितेति गुम्फनादसंभाव्यमसकृत्प्रश्नपूर्वकमुत्तरं निबद्धम् । इतः प्रभृति गूढार्थप्रती-
तिपरालंकारलक्षणपरम् । असंलक्षितसूक्ष्मार्थप्रकाशनं सूक्ष्मम् । इह सूक्ष्मः स्थूलमतिभि-
रसंलक्ष्यो योऽर्थः स यदाऽङ्गुल्यग्रबाह्वादिभिरिङ्गितेनाकाराभ्यां संलक्ष्यते तदा तस्य संलक्षितस्य वि-
दग्धं प्रति प्रकाशनं सूक्ष्मम् । तत्रेङ्गितेन यथा संकेतकालमनसं विटं ज्ञात्वा विदग्धया हसन्ने-

अ॰
स॰ स्व॰
५॰
50

आर्पिताकूतं लीलापद्मं निमीलितम्। अत्र संकेतकालाभिप्रायः विटसम्बन्धिभूतेयादिनेङ्गि-
तेन लक्षितो रजनिकालभाविना लीलापद्मनिमीलनेन प्रकाशितः। आकाराद्यथा वक्त्र-
स्यंदिस्वेदबिंदुप्रबन्धैर्दृष्ट्वाभिन्नं कुंकुमं कापि कण्ठे। पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पा-
णौ खड्गलेखां लिलेख। अत्र स्वेदहेतुकं कुंकुमभेदरूपेणाकारेण संलक्षितं पुरुषायितं पाणौ
नखड्गलेखनेन प्रकाशितम्। उद्भिन्नवस्तुनिगूहनं व्याजोक्तिः। यत्रानिगूढं वस्तु उत्तानाश्लिष्टि-
भिन्ना उद्भिन्नं प्रकटतां प्राप्तं सत् केनचिदपदेशेन रूपव्याजस्य वचनाद्व्याजोक्तिः। यथा शैलेन्द्र-
प्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासंगभंगाकु-
लः। हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽव-
ताद्वः शिवः। अत्र रोमाञ्चादिनोद्भिन्नः सात्त्वभावः शैत्यप्रदेशेनापलापितः। यद्यपि अपह्नुतावपि
साम्येन तत्त्वाव्योपनेन पुनरप्युद्भिन्नत्वेन प्रकाशितस्य तथाप्यपलापमात्रविंतया अस्यालंका-
रस्योल्लेखः। ननु अपह्नुतिग्रन्थे यथा सादृश्यार्थो योऽपह्नवः सापह्नुतिः। तथा अपह्नवाया अपि यत्सा-
दृश्यं साऽप्यपह्नुतिरिति निश्चायितम्। व्याजोक्तौ चोक्तः प्रकारो विद्यते तत्कथमियमलंकारान्तर

तेन कथ्यते सत्यम् उद्भटसिद्धान्ताश्रयेणैतन्न त्वेतन्मम् न हि तन्मते व्याजोक्त्याख्यमलंकरण
मास्ते रुद्रटस्य सद्भावान्न व्यतिरिक्तापह्नुतिरिति इत्ययमलंकारो नेति हि द्वः अन्यथोक्त
स्य वाक्यस्य काकुश्लेषाभ्यामन्यथा योजनं वक्रोक्तिः अन्येन व्यपदेशमासाद्य व्याजोक्तमनन्तरं व
चनम् यद्वाक्यं केनचिदन्यथा अन्याभिप्रायेणोक्तम् सत्परेण वक्त्रा काकुप्रयोगेन श्लेष
मुखेन वा अन्यथा अन्यार्थपरत्वेन योज्यते तदुक्तिर्वक्रोक्तिः काकुप्रयोगेन यथा गुरुप
रतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् अलिकुलकोकिललालिते नैष्यति सखि सुरभिसम
योऽसौ अत्र पतद्वाक्यं नायकया आगमननिषेधपरत्वेनोक्तं तत्सख्या काकुप्रयोगेण विधि
परतां प्रापितम् काकुवशाद्धि विधिनिषेधयोर्विपरीतार्थसंक्रान्तिः तत्र श्लेषोऽभंगसभंगत्वे
नोभयमयत्वेन त्रिविधः तत्राभंगश्लेषमुखेन यथा अहो केनेदृशी बुद्धिर्दारुणा तव निर्मि
ता त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् अत्र दारुणेति प्रथमान्तं प्रक्रान्तं श्लेषभंगपातृ
तीयान्ततया सम्पादितम् सभंगश्लेषमुखेन यथा त्वं हालाहलभृत्करोषि सततं सोमृक्कां
समालिंगितो हालां नैव बिभर्मि नैव च हलं मुग्धे कथं हालिकः सत्यं हालिकतैव ते समु

ग्रं
स· ख·
५१
51

विनासत्तस्पगोवाहनेवक्रोक्तेरितिजितोहिमाद्रिस्तनयास्मेरोवताडः शिवः उभयमुविन
यथा विनये ऽपालस्यलोनक्रीडितुसहमनेनसहपानात्विनये ऽपालोस्मिनतत्त्यतो।
तद्वयामिदंपाणौ किंमेङ्गोहरेणश्वयान्तुगणपतिर्यदिनतेभिमतः करहठोद्धिविनाशक
साहेलोकेरकिंनजानामि वेद्यग्रहणेनाविनानास्मिरसेकिंप्रतारयसेवम् देव्येशादिहावि
नामिदंनेदिनाह्वयतोहारवाहोपानदं हूंभयद्वतीतिनिकरस्थितेरतेः कस्य यदेनेह्वसि सत्य
तस्सम्यत्वेवैघहारवाहेः वस्तुराहेनेनक्रीडाभवतासहकोटपोनाजिड्गांगं किंवस्तुभिनेन्द
नोसूंडरास्तुरानेवपण्णपूरः आरोपयसिस्तुथाविंनाहममभिज्ञाकिलनवदंकस्य दिव्यवंबस
हसंदस्येनेतिनप्रश्नमभिधानम् इतिह्वनपक्षणात्पेशलपासकलीलाप्रयुक्तवक्रोक्तेः।
हर्षवपानरलनारकसानममव्याङ्गवान्पावः वक्रोक्तेःप्राह्वङ्गालंकारसामान्यवचनो।
पिरहालंकारविशेषेसातेनः सूक्ष्मवस्तुस्वभावयथावद्वर्णनं स्वभावोक्तिः इहवस्तुस्व
भाववर्णनमात्रेनालंकारः सति नत्वेसर्वंकाव्यमलंकारःस्यात् नाहिनत्काव्यमस्ति यत्रव
स्तुस्वभाववर्णनंनावेद्यते तदर्थंसूक्ष्मग्रहणम् सूक्ष्मः कविनेत्रमात्रस्यागम्योनपवनान्त्रे।

भिन्नपदयोर्वस्तुस्वभावस्तस्य यथा यथावदन्यूनानतिरिक्तत्वेन वर्णनं स्वभावोक्तिरलंकारः
उक्तेर्वा वाचो युक्तेः प्रस्तावादिह लक्षणम् भाविकरसवदलंकाराभ्यासस्याभेदे भाविकप्रसंगे
निर्णीयते उदाह. अंकारोनखकोटिवज्रपुटकव्याप्तहृतो हुंकेन तत्त्वान्याः अंनलकौनकव्याप्ति
करेसोत्कारसीमंतिनः पृष्ठाक्ष्मे पृष्ठ्वा सन्नस्तनभरोत्सेधा कपाली सुधा सेकात्केकरलोचने
स्पष्टातिनः कर्णावतंसीभवत् अतीतानागतयोः प्रत्यक्षायमाणत्वं भाविकम् अतीतानागतयोर्भूतभाविनोरर्थयोरलौकिकत्वेनास्पष्टत्वमाध्यात्मसम्बन्धराहित्यप्राप्तसंदर्भस्तमर्थं
ततवाक्यप्रत्यक्षायमाणत्वं भाविकं कविगतो भावश्चाशयः श्रोतरि प्रतिबिम्बत्वेनास्तीति ।
भावो वा भावना पुनः पुनः चेतसि विनिवेशनं सोचास्तीति न चेयं भ्रान्तिः भूतभाविनोर्भू
तभावित्वेनैव प्रकाशनात् नापि रामो भूदितिवदस्त्वदृष्टमात्रे भूतभाविगतस्य प्रत्यक्ष ।
नाख्यसाधर्मे स्पष्टस्याधिकस्य प्रतिलम्भात् नापि उपमातिशयोक्तेः अन्यस्यान्यथाध्य
वसायाभावात् नाहि भूतभाविभूतभावित्वेनाध्यवसीयते अभूतभाविवा भूतभावित्वे.
ननापि प्रत्यक्षमप्रत्यक्षत्वेन अप्रत्यक्षं वा प्रत्यक्षत्वेन नाहि प्रत्यक्षत्वं केवलं वस्तुधर्मः प्र.

ध्व॰ निपदापेतयैववस्तुनितथाभावात् यदाहुः तत्रयोज्ञानप्रतिभासमात्मनोन्वयव्यतिरेका
सं॰ ख॰ वनुकारयोतिसप्रन्यतइतिकेवलंवस्तुप्रतिपत्तेप्रतिपत्तेः सामग्र्युपयुज्यते सा च लोक
५२ यात्रायां चक्षुरादीन्द्रियस्वभावयोगिनामतीन्द्रियार्थदर्शने भावनारूपा वाक्यार्थविदां च भा
52 वनास्वभावैव सा च भावना वस्तुगत्यानपेक्षुतत्वप्रपञ्चा अनपेक्षुतानां वस्तूनामादरप्रत्यये
नत्वादिसन्धार्यमानत्वात् नापि भूतभाविनामप्रत्यक्षाणां प्रत्यक्षतयैव प्रतीतेरेवार्थगम्भी
रत्वकारणेयं प्रतीयमानोत्प्रेक्षा तस्याश्चाभिधानरूपाध्यवसायस्वभावत्वात् नह्यप्रत्यक्षत्वेना
ध्यवसीयते किं तर्हि काव्यार्थविद्भिः प्रत्यक्षत्वेनेदृश्यत इति नापि वस्तुगतइवार्थप्रत्यक्षताप्र
योजिका तस्याश्चाभिमानरूपायाः प्रतिपत्तृधर्मत्वात् यदाहुः अभिमानेवसायोक्तिः ज्ञानध
र्मे सुखादिवत् इति काव्यविषये च प्रयोजनापि प्रतिपत्तेवनापेक्षुतपदार्थदर्शनादतीता
नागतप्रत्यक्षत्वप्रतीतेः न चाकाशपुष्पलिङ्गादिकम् लिङ्गालिङ्गप्रभावेनप्रतीत्यभावात् योगीव
त्प्रत्यक्षतया प्रतीतेः नाप्ययं पुरः प्रस्फुरद्रूपतया सर्वमान्यांशप्रतीतेः रसवदलंकारः रत्या
दिविनष्टजातानां तदनुबन्धः यादिभावादीनामपि साधारण्येन सहृदयसंवादितया परमाहेन

त्वान्निवस्प्रतीतौ तस्याभावात् इह च नाटस्येन भूतिभावेनांस्फुटतयाभिन्नद्वैतवादिवत्प्रती-
तेः स्फुटप्रतिपत्तृरवालंत्त साधारण्यप्रतीतौ स्फुटप्रतीतितिनामिन्नकद्रैन्नरवालेको रसवद-
लंकारः स्यात् नापीयं संदरवस्तु स्वभाववर्णनात्स्वभावोक्तिः तस्यां लौकिकवस्तुगतस्य स्वधर्म-
वर्णने साधारण्येन सहृदयसंवादसम्भवात् इह च लोकोत्तराणां वस्तूनां स्फुटतयानाटस्ये
न प्रतीते ऽ वित्तु लौकिकानामपि वस्तूनां स्फुटत्वेन प्रतीतौ भाविकस्वभावोक्त्योः समावेशः
स्यात् न च सहृदयसंवादमात्रेण स्वभावोक्त्योः रसवदलंकारयोरभेदः वस्तुसंवादरूपत्वात्स्व-
भावोक्तेः चित्तवृत्तिसंवादरूपत्वाद्रसवदलंकारस्य उभयसंवादसम्भवे तु समावेशोपि चर-
नेयं च वस्तुगतस्य स्वधर्मवर्णनेन तत्र स्वभावोक्तिः स्यात् अन्यत्र रसवदलंकार एव न ह्यप्यंशु-
ह्यानामनुकूलत्वहेतुकाजगीत्वर्थं समर्पणात्साधारणोगुणः तस्य हि स्फुटास्फुटोभयरू-
पवाच्यार्थगतत्वेन जगीति समर्पणरूपं अस्य जगीति समर्पकस्य मतः स्फुटत्वेन प्रतीतौ स्व-
रूपप्रतिलम्भः तस्मात्स्यसर्वोत्तीर्णपवालंकारः लद्व्येवायं प्रवृत्तप्रयोगो नटर्पणेन यथा
ध्वनिजं यातेयोगे इसहानसाजम्भसंभवः येनैकवुलकेटद्यौ दिद्योनेमनसकच्छपौ यथा

अ॰
स॰ स्व॰
५२
53

वा हृद्यं वा इति प्रारम्भेऽत्र समस्तदर्शिके स्वरूपवर्णने अत्राहि प्रत्यक्षामिव स्फुटत्वेन तदीयं रूपं दर्श्यते
एवं तत्रैव क्रोधप्रतिवर्णने पुंलिङ्गवर्णनादौ ज्ञेयम् अयं च अविचारलेशः सम्भवति इह वक्राद्वि
द्धर्णनीयस्य वर्णनावशादेव प्रत्यक्षायमानत्वम् अविद्यत्वप्रत्यक्षायमानस्यैव वर्णनम् आद्ये।
यथोदाहृतं प्राक् द्वितीयं यथा अनातपत्रोयमत्र लक्ष्यते सितातपत्रैरिव सर्वतो यतः अचा
मरोप्येष सदैव वीज्यते विलासवालव्यजनेन कोप्ययम् इति अत्र प्रथमप्रकारविषयोयमलं
कारः प्रकारान्तरगोचरः कविसमर्पितानां धर्माणामलंकारत्वात् नहि माधुलावण्यादीना
मिव वस्तुसन्निवेशानाम् अपि च प्राह्वानाकुलतावेति तस्य हेतुं प्रवदन्तेरतिभामहीयेवाचा।
मनाकुलेन भाविकमिति चोद्भटेन लक्षणे व्यस्तसम्बन्धरहितशब्दसमर्पितत्वप्रत्यक्षायमा
नत्वप्रतिपादकं कथं प्रयोजकीभवेत् यदि वस्तुसन्निवेशधर्मिगतत्वेनापि भाविकं स्यात् त
स्माद्वास्तवमेव महतत्वत्र प्रकारविषयं वर्णितमिति नायमत्रालंकारः यदि तु वास्तवम
पि सौंदर्यं कविनिबद्धवस्तुनिबद्धं वा सकलवस्तुगोचरीभूतं स्वभावोक्तिवदलंकारतया वर्ण्य
ते तदायमपि प्रतीकारोनानीवडः श्लिष्टः अतएव प्रत्यक्षास्वरूपं ते यत्रापरोक्षीभूतभाविनः त

द्राविकामित्येतावदेवात्यैभाविकलक्षणमकारि स्वभावोक्त्या किं विस्तारेणेत्यपास्तं तदनन्तरमस्य
लक्षणं कृतम् समग्राद्धिसम्बन्धवर्णनमुदात्तम् स्वभावोक्तौ भाविके च यथास्थितवस्तुवर्ण
नं न त्वद्भुतत्वेनारोपितवस्तुवर्णनात्मना उदात्तस्यावसरः तत्रासंभाव्यमानविभूतियुक्तस्य
वस्तुनो वर्णनं कविप्रतिभोत्थापितमैश्वर्यलक्षितमुदात्तम् उदा मुक्ताः केलिविसूत्रहारग
लितास्संमार्जनीभिः हृताः प्रातः प्राङ्गनसीम्नि मंथरचलद्बालाङ्घ्रिलाक्षारुणाः दूराद्दा
डिमबीजशङ्कितधियः कर्षन्ति केलीशुका यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायित
म् अङ्गभूतमहापुरुषचरितं च उदात्तमाहुः सामान्यादिहाभिधानम् महापुरुषाणामुदात्तच
रितानामङ्गीभूतवस्त्वन्तराङ्गभावेनोपनिबध्यमानं चरितं चोदात्तम् महापुरुषचरितस्यो
दात्तरूपत्वात् उदाह तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी निवसन्बाहुस
हायश्चकार रक्षःक्षयं रामः अत्रारण्यवर्णनोये रामचरितमङ्गत्वेन वर्णितम् रसभावतदाभा
सतत्प्रशमानां निबन्धे रसवत्प्रेयऊर्जस्विसमाहितानि उदात्ते महापुरुषचरितस्याविच
छिन्नरूपताश्चिन्तनत्वाद्विशेषः स्वभावतस्तु रसादीनामिह न तदलंकाराणां प्रस्तावः अत एव

ग्र॰
स॰ स्व॰
५४
54

यथायोलंकाराद्युपग्रहलालिताः तत्र विभावानुभावव्यभिचारिभिः प्रकाशितो रत्यादिश्चित्तवृत्ति।
विशेषो रसः भावो विभावानुभावाभ्यां सूचितो निर्वेदादिस्त्रयस्त्रिंशद्भेदः देवतादिविषयश्च र।
त्यादिः तदाभासो रसाभासो भावाभासश्च आभासत्वं च विषयप्रवृत्त्यनौचित्यात् तत्प्रशमश्च।
प्रकाराणां निवर्तमानत्वेन प्रशमस्यदवस्थानत्रापि रसस्य परा विश्रान्ति इत्येतन्मात्मानसस्यवती
ति परिशेषभेदाविषयोयं द्रष्टव्यः एषामुपनिबन्धे क्रमेण रसवदलंकारादयोलंकाराः रसावि
घ्नेय यत्र निबन्ध्यते अपरांगत्वात् तत्र रसवत् प्रेयतरं प्रेयोनिबन्धनमेव द्रष्टव्यम् एवमूर्जो
बलं विधेय यत्र तदपि निबन्धनमेव अनौचित्यप्रवृत्ततत्वात् तत्र बलयोगः समाहितं परिहा
रः सर्वप्रवृत्तत्वाद्भेदाविषयः प्रशमपर्यायः तत्र यस्मिन्दर्पणे वाक्यार्थीभूतरसादयो रस
वदाद्यलंकाराः तत्राङ्गभूतरसादौ विषयोद्दिष्टो योऽदात्तालंकारः यन्मतेऽङ्गभूतरसादि।
विषये रसवदाद्यलंकाराः अन्यस्य रसादिध्वनिनाख्यापानत्वादात्तालंकारस्य विषये सत्त्व।
द्विषयस्य रसवदादिनाख्यानत्वात् तत्र रसवत उदाहरणम् किं हास्येन न मे प्रयास्यसि पुनः।
प्राप्तश्चिराद्दर्शनं केयं निष्करुणप्रवासरुचिता केनासि दूरीकृतः स्वप्नान्तेष्विति वो वदन्प्रिय

नस्त्वासन्नवृद्धयग्रहोऽब्रह्मरोदितिप्रजनवाक्कल्पयस्तां रतिप्रस्तौजनतः एतन्मतद्वये उदाहर-
णम् वाक्यार्थीभूतोऽत्र करुणो रसः अंगभूतस्तु विप्रलम्भशृंगारः एवं रसान्तरेष्वपि ह्यदाहार्यम् प्रेया-
लंकाराद्यो विषयो घमनपेक्ष्यो ह्याङ्क्रियते नव प्रेयोलंकारो यथा गाढालिंगनवामनीकृतकुचप्रो-
द्भूतरोमोद्गमा सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा मा मा मानद माति मामल-
लमिति क्षामाक्षरोल्लापिनी सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् अत्र नायि-
काया हर्षौत्सुक्यो व्यभिचारभावः यथा वा तद्वक्त्रामृतपानदुर्ललितया दृष्ट्या कविश्राम्यतां तद्वा-
क्श्रवणाभियोगपरयोः श्रव्यं जनः श्रोत्रयोः एभिस्त्वयि परिरम्भनिर्भरतरैरंगैः कथं स्थीयतां क-
ष्टं तद्विरहेण सम्प्रति वयं कष्टामवस्थां गताः अत्रावितर्कौत्सुक्यो व्यभिचारिभावः एष एव च भावा-
लंकारः भावस्य चात्र स्थितिरूपतया वर्तनम् शान्त्युदयावस्थे तु वर्ण्येते ऊर्जस्वि यथा हृताकर्ष-
णसोऽहमत्र इह से तत्प्रार्थ्य यानेश्वति वेतः कालकलामपि कुरुते नैवास्थितिं तां विना एते
राजकुलस्य विद्रुतरतेरंगैरनंगातुरैः सम्पद्येत न कस्य तस्य मित्येतन्नवेद्मि स्फुटम्
अत्र रावणस्य अभिलाषको विप्रलम्भशृंगारोऽन्यस्थकं व्यभिचारिभावेनानौचित्येन प्रवृत्तो

अ॰
स॰ स्व॰
५५

समाहितं यथा अत्रागोः सख्याः सत्ववल्लभो हर्षितमानिलीनः पूर्णां तं च सार्धमथ सस्मरणं भुजङ्गः सा
भावान्तरस्य न च वं डिगतोपि रोषो नोज्झाम्भवासननतया प्रसरं ददाति अत्र कोपस्य प्रशमः एव
मन्यजाण्डुदाहार्यम् भावोदयसन्धिशबलतास्तु पृथगलंकारा भावस्योत्पत्तिरूपस्य उदयतद्धा
वस्था सान्धिर्द्वयोर्विरुद्धयोः स्पर्धिभावेनोपनिबन्धः शबलता बहूनां पूर्वपूर्वोपमर्देनोपनि
बन्धः एते च पृथग्रसवदादिभ्यो भिन्नत्वेनालंकाराः एते च पृथग्रसवदादिभ्यो भिन्नत्वेनालंका
राः एतत्प्रतिपादनं चोद्भटादिभिरेषां पृथगलंकारत्वेनानिरूपणात् अत एव संसृष्टिसंकरवै
लक्षण्येन एते सर्वालंकाराः पृथक् केवलत्वेनालंकारः इति सर्वालंकारशोभत्वेनोक्तम् संसृष्टि
संकरयोर्हि समस्तानां तयालंकाराणां स्थितेः तद्वैलक्षण्यप्रतिपादनमेतत् तत्र भावोदयो य
था एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखग्लपितया चाटूनि
कुर्वन्नपि आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात् मा भूत्सुप्त इवेत्यमन्दवलि
तग्रीवं पुनर्वीक्षितः अत्रौत्सुक्यस्योदयः भावसन्धिर्यथा वासेन नारीनयनाश्रुधारां कृ
पाणधारामथ दद्दतिरेण उत्सयन्नेकरजः करेणकर्तव्यमूढः रभसोरभूव अत्रके ताच्छ

रतिभावरणौत्सुक्ययोः सन्धिः भावशबलता यथा काकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि
दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम् किं वक्ष्यन्त्यपकल्मषाः कृतधि
यः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं पास्यति अत्र वितर्कौत्सुक्यम
तिस्मरणशंकादैन्यधृतिचिन्तानां शबलता तदेते विवक्षाश्लिगतत्वे नालंकारालाहिताः प्र
धानैव त्वेषां सर्वेषामलंकाराणां संश्लेष समुपापादितमलंकारद्वयमुच्यते तत्र संश्लेषः संयो
गन्यायेन समवायन्यायेन चेति द्विधा संयोगन्यायो यत्र भेदस्योत्कटतयावस्थितिः समवाय
न्यायो यत्र तस्यैवानुत्कटत्वेन वर्तनम् तत्रोत्कटत्वेनावस्थितौ तिलतण्डुलन्यायः इतरत्र तु
क्षीरनीरसादृश्यम् क्रमेण तदुच्यते पण्यातिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिः उक्तालंकारा
णां यथासंभवं यदि द्वाविद्वागपतत्त्वचरनं स्यात्तदा तेषां पृथक्त्वपर्यवसिता उक्तलंका
रान्तरमेवाकांक्षिताति विचार्यते तत्र यथा बाह्यालंकाराणां सौवर्णमाणिक्यप्रभृतीनां पृथ
क्त्वादत्ताहेत्वेऽपि सन्निचरनोत्कृतचारुत्वान्तरं जायते तद्वत्काव्येऽप्युक्तालंकाराणामपि संयो
जने चारुत्वान्तरमुपलभ्यते ते नालंकारान्तरप्रादुर्भावो न पृथक्त्वपर्यवसानमिति निर्णयः प्र

अ॰
स॰ स्व॰
५९
56

लंकारांतरत्वेन संयोगन्यायेन संसृष्टावप्यसौ भेदः समवायन्यायेन वा अस्य संकरावगम इति द्वैत
म् एवं च संसृष्टिः उक्तत्र संकरः अत एव तिलतण्डुलन्यायः क्षीरनीरन्यायश्च तयोर्यथाख्यं
नामवगमयतः तत्र तिलतण्डुलन्यायेन भवंती संसृष्टिः त्रिविधा शब्दालंकारगतत्वेन अर्थ
र्थालंकारगतत्वेन उभयगतत्वेन च संकरस्तु प्रभेदप्रतानो वक्ष्यते तत्र शब्दालंकारसंसृष्टिर्यथा
उत्तमसौभरलोभपरिश्रमतश्रमरमसत्वसमं भ्रमतश्शोभया वलितया विदधे कलमेखलाकलक
लोलकलोलदृशान्यया अत्र अनुप्रासयमकयोर्विजातीययोः संसृष्टिः अत्रैवालकलोलक
लो इति तथा कलोलकलोल इति सजातीययोः संसृष्टिः अर्थालंकारसंसृष्टिर्यथा देवैस्तपा
गलाति वल्लरमंदायमुन्मीलयास्यनलिनीव समं गमक्रम पवनदाननत्र रुवेववावेलत्रणमानाः
पवणस्वरंत्यजातिनिघ्नतिभः प्राप्यांकः अत्र सजातीययोरुपमोत्प्रेक्षयोः संसृष्टिः निमग्नीव
नमोगानिवर्धतीवांजनं नभः अत्र सत्यरूपमेवेव दृष्टिर्निष्फलतां गता अत्रोपमोत्प्रेक्षयोर्विजा
तीययोः संसृष्टिः उभयसंसृष्टिर्यथा आनंदस्यंदरपुरंदरमुक्तमाल्यमौलो हठेन निहितं म
हिषासुरस्य पादांबुजं भवतु मे विजयाय मंजुमंजीरशिंजितमनोहरमंबिकायाः अत्रोप

मानुप्रासयोः संसृष्टिः पादाम्बुजमित्यत्र हि उपमायां मञ्जीरयोः सिञ्जितयोगोऽव्यवस्थापकं प्रमा
णम् साहित्यपकोऽप्रतिकूलः पारिशेष्यादुपमां प्रसाधयति तदेवं त्रिधा संसृष्टिर्निर्णीता ।
अधुना नीरक्षीरन्यायाश्रयेण संकरलक्षणमुच्यते क्षीरनीरन्यायेन तु संकरः मिश्रत्वं स एव अलं ।
कारभेदस्त्वलंकारभेदं वा मिश्रत्वं संकरः तत्र मिश्रत्वमङ्गाङ्गिभावेन संशयेन एकवाचकानुप्रवे
शेन च त्रिधा भवत्संकरं त्रिभेदत्वमुपयाति क्रमेणोदाहरणम् अङ्गुलीभिरिव केशसंचयं स
न्निगृह्य तिमिरं मरीचिभिः कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी अत्राङ्गु
लीभिरिवेत्युपमा सैव सरोजलोचनमित्यस्य उपमायाः प्रसाधिका रजनीमुखमेव श्लेषमूला
तिशयोक्तिः प्रारब्धवदनावलोकयोर्मुखयोरभेदाध्यवसायात् अत एवानयोरङ्गाङ्गिभावः ए
वं वा वाक्योऽत्र समासोक्तेरुपमेश्लेषानुगृहीताया अतिशयोक्तेरुत्थापकत्वं चैतेषां प्रका ।
शितायाश्चन ग्राहकाभावे न तस्याः समर्थनात् सा च समर्थापिता सती समर्थोपकानां
चमत्कारकारिणेतरानिबन्धनमित्यङ्गाङ्गिभावः यथा वा त्रयीमयोऽपि प्रथितो जगत्सु यद्वा ।
हणं प्रत्यगमद्विवस्वान् मन्ये महाशैलात्पतितो न तत्र विवेषामुच्चैः अवड्वाग्निमध्यम् अत्रम

ग्र॰
स॰ स्व॰
५२
57

थमेर्थे विरोधप्रतीतोत्पत्तिहेतुः श्लेषः तद्गुणानां तु विरोधश्लेषौ द्वावलंकारौ तदनुग्रहीतादिति
येर्थे मन्येपद प्रकाशितोत्प्रेक्षा अतस्त्वांगांगिभावः तथा सत्र यत्कारणमुत्प्रेक्ष्यते तेनत्रावि विरोधश्ले
षानुप्रवेशः यस्मान्नेकार्येऽनुत्प्रेक्षितानिमित्तेन नपातितत्वाविनप्रवेशो वस्तुस्थितानुत्पत्त्या स्थितावप्य
नुत्पत्त्याभ्युदानाभ्यां ताभ्यां सभेदेनाध्यवसितौ तेयौ तेनात्रांगांगिसंकरः न च विरोधप्रतिभोत्पत्तिहेतौ
श्लेषे श्लेषस्याविरोधेन सहांगांगिसंकरः उत्प्रेक्षाया वानिमित्तगतत्वात्तिशायोन्नासहायं संकरः
ताभ्यां विनानयोरनुत्थानात् अतश्च निरवकाशत्वाद्बाधकं न च सत्त्वं विरोधमंतरेणापि श्लेषो
दृश्यते इति श्लेषस्य सावकाशत्वमिति यतेनदृष्टो विरोधमंतरेण श्लेषो न भवतीति किं तस्यालं
कारांतरविविक्तो विषयः न श्लेषस्य विषयोऽस्तीति निरवकाशत्वात्तेषां बाधः तन्मध्ये चाविरोधो
नुप्रविष्ट इति सोपि तेन बाध्यते इति न कश्चिद्दोषः एवमर्थालंकारसंकरउदाहृतः शब्दालंका
रसंकरस्तु क्वाचिदुदाहृतो यथा राजति तटीयमभिहतदानवरामातिपातिसारावनद्यगजता
मुष्य मा विरतो हा नव रामातिपाति सारावनदा अत्र यमकानुलोमप्रतिलोमयोः शब्दालंकार
योः परस्परानुग्रहत्वेनांगांगिसंकर इति एतच्च न समग्गावर्जकम् शब्दालंकारयोः शब्दवदुभका

योपकारकत्वाभावेनांगांगिभावाभावात् प्राप्तालंकारसंसृष्टिस्तत्र श्रेयसीयथोदाहृतं पूर्वम्।
यत्रात्र प्राप्तालंकारद्वयमेकवाचकानुप्रविष्टमिति तत्तृतीयः संकरो ज्ञेयः एवमेकः प्रकारो दर्शि।
तः द्वितीयः प्रकारस्तु संदेहसंकराख्यो यत्रान्यतरपरिग्रहे साधकं प्रमाणं नास्ति बाधकं वा प्र।
माणं न विद्यते तत्रन्यायप्राप्तः संशय इति संदेह इति संकरस्तत्रावि ज्ञेयः यथा यः कौमारह
रः स एव हि वरः ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः सा
चैवास्मि तथापि चौर्यसुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते
अत्र विभावनाविशेषोक्त्योः संदेहसंकरः तथाह्युत्कण्ठाकारणाभावेप्युत्कण्ठोक्तिर्या अत्रैव वि
भावना स च कारणाभावो यः कौमारहर इत्यादिना कारणविरुद्धत्वेन प्रतिपादितः तथा
यः कौमारहर इत्याद्यनुत्कण्ठाकारणसद्भावेप्यनुत्कण्ठया प्रवृत्तत्वाद्विशेषोक्तिः सा च प्र
नुत्पत्तिः समुत्कण्ठत इति विरोधोत्पत्तिमुखेनोक्ता अतएव द्वयोरप्यस्मु एवमन्यत्रोदाहृतम् तथा
नयोः प्रत्येकं साधकबाधकप्रमाणायोग इति संदेहसंकरोयम्॥ यथा वा यद्वक्त्रं वंदे नव
यौवनेन प्रथमप्रवृद्धकलाउल्लीलाविलसत्प्रकाशकान्ति उद्दामरामाहृत्मानप्रज्ञाविद्रावणो मन्त्र इव स्मर

अ॰
स॰ स्व॰
५८
58

स्य अत्र वक्त्रं चंद्र इवेति किमुपमा उत वक्त्रमेव चंद्र इति किं रूपकमिति संशयः उभयथापि समा
सस्य भावात् उपमितं व्याघ्रादिभिरित्युपमासमासो व्याघ्रादीनामाकृतिगणत्वात् न चात्र सा
धकबाधकप्रमाणसद्भाव इति संदेहसंकरः यत्र त्वेकस्यावित्यपरिग्रहे साधकं बाधकं वा प्रमाणं
विद्यते तत्रानियतत्वपरिग्रहः तत्रानुकूल्यं साधकत्वं प्रातिकूल्यं बाधकत्वम् तत्र साधकत्वं यथा
प्रसरद्बिंदुनादाय शुद्धामृतमयात्मने नमोनंतप्रकाशाय शंकरक्षीरसिंधवे अत्र शंकर
एव क्षीरसिंधुरिति रूपकस्यामृतमयत्वं साधकम् तस्य शंकरापेक्षया क्षीरसिंधावेवानुकूल
त्वात् उपमायास्तु न बाधकं शंकरेणोपचरितस्य सद्भावात् यथा वा एतान्यवंतीश्वरपारिजा
तजातानि तारापतिपाण्डुराणि संप्रत्यहं पश्यपतद्दिग्वधूनां यशःप्रसूनान्यवतंसयामि अ
त्रावतंसनं प्रसूनेष्वनुगुणमिति रूपकपरिग्रहे साधकं प्रमाणम् बाधकत्वं यथा शरदीव
प्रसर्पंत्यां तस्य कोदंडजोंकृतो विनिद्रज्जृम्भितहरिविद्योतदीधिरजायत अत्रावेक्ष्यत न दीधि
तिवेत्युपमापरिग्रहे विनिद्रज्जृम्भितहरिरिति साधारणं विशेषणं प्रमाणम् उपमितं व्याघ्रा
दिभिः सामान्याप्रयोग इति वचनादुपमासमासे प्रतिकूलत्वात् अतश्चापारिशेष्याद्रूपकपरि

ग्रहः ननु वरद्वीवेत्युपमायोपमासाधकत्वेन विशेष्यानहि व्याघ्रेण पंचो शास्त्रसिद्धः न स्वैकेनालं
कारेण प्रक्रान्ते नानिर्वाहः कर्तव्य इति राजा स्वैबानापि यमं सह सकाशद्ववचनम् नाध्येयमन्याय।
उत्तरोत्तरमासस्य प्रकर्षवर्णनाविवक्षणे प्रक्रान्तोपमापरित्यागेन रूपकनिर्वाहस्याविनमाते।
विपर्ययस्तु दुष्ट एव यथा येनेन्दुर्देहनो विद्धं मलयजं हारा जहारायते तस्मात्स्वकृते सामान्य
प्रयोगे उपमापरिग्रहे बाधक इति मयूरव्यंसकादेराकृतिगणत्वाद्रूपकसमाश्रयेण रूपक
मेव बोद्धव्यम् एवं भाष्याब्धिः ज्ञापि गम्भीर इत्यादौ द्रष्टव्यम् साधकबाधकाभावे तु सन्देह।
संकरः यथोदाहृतम् तृतीयस्तु प्रकार एकवाचकानुप्रवेशलक्षणो यत्रैकस्मिन्वाचके अ
नेकालंकारानुप्रवेशो न च सन्देहः यथा स्तनादिरानिगंतान्नूनं नरकप्रतिपन्थिनो तथापि।
मूर्ध्नि गंगेव चक्रधारापातिष्यति अत्र स्तनादिरानिगतेति साधारणविशेषणहेतुका उपमान
रकप्रतिपन्थिनीति श्लिष्टविशेषणसमर्थ्यं श्लेषोपमा प्रतिभोत्पत्तिहेतुः श्लेषश्चैकस्मिन्नेव श
हेव प्रविष्टो नस्योभयोपकारित्वात् अत्र च यथार्थं श्लेषेण सहोपमायाः संकरस्तथा शब्दस्ये
षेण सह हर्षणेन यथा सपुष्करया तेन तरंगपाणिभिर्मन्दं समारब्धमृदंगवाद्ये उद्यानवापीपयसी

अ॰
स॰ स्व॰
५९

59

वयस्यामेणीदृशो नासंगरहे रमंतेत्र पयसीव नासंगरहे रमंते इत्येतावतैव समुत्थितोपमा
निष्पन्ना सम्प्रश्नरूपोत्प्रेक्षयोतिशयोक्तिश्लेषेण सहैकस्मिन्नेव शब्दे संकीर्णो शब्दालंकारयोः पु
नरेकत्र वाचकानुप्रवेशो नैव तत्र संकीर्णत्वम् अत एव व्यवस्थितत्वमन्योन्यानुभावित्वमप्रयोज
कम् तुल्यजातीययोरर्थालंकारयोरेकवाचकानुप्रवेशासम्भवात् शब्दार्थवर्त्यलंकारसंकर
स्वभेदोऽत्र प्रकाशितः संसृष्टावनभावित इति त्रिप्रकार एव संकर इहोक्तः स्थानोपहार.
स्त्रम् एवमेते शब्दार्थोभयालंकाराः संक्षेपतः सूत्रिताः एवमिति पूर्वोक्तप्रकारपरामर्शः
एते इति प्रबन्धेन स्वरूपनिर्देशः सूत्रिताः अलंकारसूत्रैः सूत्रिताः संक्षेपेण प्रतिपादिताः तत्र
शब्दालंकारा यमकादयः अर्थालंकारा उपमादयः उभयालंकारा लाटानुप्रासादयः संसृष्टि
संकरप्रकारयोरपि कयोश्चिन्मरूपत्वात् लोकवदाश्रयाश्रयिभावश्च तदलंकारत्वनिबन्ध
नम् अन्वयव्यतिरेकाभ्यां तत्कार्यत्वेऽपि योजिवेनानन्तदलंकारत्वे तदलंकारत्वप्रयोजकत्वश्रो
तोपमादेरपि शब्दालंकारत्वप्रसंगात् तस्मादाश्रयाश्रयिभावेनैवाविरंतनमतास्थितिरिति
शिवम् समाप्तमिदमलंकारसर्वस्वम् कृतीराजानकरुचकपादानाम् ॥ ॥ ॥